सदिप्रत्ययेनाभिहितमविकरणमिति कृत्वा सप्तमी न प्राप्नोतीत्याशंक्य नवाऽनन्तरेणाभिधानात् अनभिहिते
विधानमित्यादिना प्रसज्यप्रतिषेधे पर्युदासे वाऽनर्थे दूषणं परिहृत्य यदि द्रव्यं साधनं स्यात्तदा तदेकमेव तत्त्वा
भिहितमिति पूर्वोक्तपरिहारो न संभवत्यपि शङ्क्यः साधनं तदा तस्याभेदादनभिहितत्वसंभवाद्वचनस्योक्तपरिहार
इत्यभिप्रेत्य किं पुनर्द्रव्यं साधनमाहोस्विद्गुण इत्याशंक्योक्तं किं पुनः। साधनं न्याय्यं गुण इत्याह कथं ज्ञायते एवं हि क
श्चित्कंचिद्ब्रवीति क्व देवदत्त इति स तस्मा आचष्टेऽसौ वृक्ष इति कतरस्मिन्यस्तिष्ठतीति स वृक्षोऽधिकरणं भूत्वाऽन्यशब्दे
नाभिसंबध्यमानः कर्त्ता संपद्यत इति द्रव्ये साधने यत्कर्म कर्मैव तस्यात्करणं करणमधिकरणमेवेति कैयटे
नापि यदि द्रव्यं साधनं स्यात्तदा तस्यैकरूपत्वान्नित्वं पना बाधितप्रत्यभिज्ञाविषयत्वात्तत्रार्थक्रियाकरण
निर्वर्त्यनो च घटेन जलमाहर घटं कुरु घटोऽस्तीति भेदव्यपदेशो न स्यादेकरूपत्वे च नानाशक्तिभावावगमः सिद्ध इ
ति तद्धि हननमेवेच शक्तिवादपक्षसमाश्रयके पटसंमतत्वे नकर्मत्वादौ द्वितीयादिविभक्तिवाच्यतावदतो
मतेनोपेक्षणोपायमिति भावः प्रथमायास्तु प्रातिपदिकार्थसूत्रेण विहितायाः स्वप्रकृत्यर्थ एवार्थः
स च शब्दप्रवृत्तिनिमित्तं तदाश्रयोऽपि अत एव लिङ्गग्रहणं चरितार्थं अन्यथा स्त्रीमोर्नपुंसकादिति
शास्त्रप्रामाण्ये न लिङ्गस्यापि प्रातिपदिकार्थत्वं तया तदुपादानवैयर्थ्यात् आत्मपक्ष ॥

१०१

मुख्ये ह्यारोपितप्रवृत्तिनिमित्ताश्रयोपि नातः सिंहो माणवक इत्यादौ प्रथमानुपपत्तिः अत एव गोपीत्यादौ प्रकृतेर्लाक्षणिक
त्वेपि न दोषः शक्यतावच्छेदकारोपस्य बलवत्त्वाभ्युपगमात् तटादिशब्दानामपि लिंगं वाच्यमेव विसर्गादयस्तु द्योतकाः
एवं च प्रातिपदिकार्थ इत्यस्यालिंगलिंगप्रवृत्तिनिमित्तकाश्रयाव्ययभूमादिशब्दा उदाहरणम् अतो सैवालिंगाधिकस्याहृ
त्रेमात्रपदार्थावधारणेन प्रातिपदिकार्थादिपदार्थानामन्वयाच्च न कर्माधिके प्रथमायाः प्रसक्तिः द्रोणत्वादिप्र
वृत्तिनिमित्तकानां द्रोणादिशब्दानां परिमाणत्वेन परिमाणमपि लिंगवद्विशेषणान्वयपर्यः एवं चालिंगवत्प्रातिप
दिकार्थत्वाभावात्परिमाणग्रहणं द्रोणः परिमाणमिति तु द्वौ ब्राह्मणौ विनिवदुपपन्नं एको द्वावित्यादौ संख्या
या उक्तत्वात्तदप्राप्त्या वचनग्रहणं वीरः पुरुष इत्यादौ तु पुरुषादिपदसमभिव्याहारे भेदस्याधिकस्य भानेपि तस्य वा
क्यार्थत्वेन वीरप्रातिपदिकादनपेक्षितत्वाच्छब्दान्तरोपहितविशेषणाभावात्स्वार्थमात्रनिष्ठत्वात्स्वार्थवत्त्वं तत्र भाष्यकैय
टयोः स्पष्टमित्याययमत्र विस्तरः संबोधने चेति सूत्रात्संबोधनप्रथमायाः संबोधनमर्थः प्रातिपदिकार्थापेक्षयास्य सं
बोधनस्याधिकस्य भानाच्च पूर्वसूत्रविषयतास्य सचाभिमुखीभवनानुकूलव्यापारस्तच्च हे इति प्रयोगानुपपत्तेव न
स्य क्रियायामन्वय इत्यादि विवेचितमधस्तात् यथायथं विभक्त्यर्था इत्यत्र यथायथं पदमाचष्टे ॥

भू॰
सा॰ द॰
॥।

यथायथमिति अत्रेति सुपां कर्मादिवाचकत्व इत्यर्थः विषयतायां इति धात्वर्थतावच्छेदकफलशालित्वमुख्यकर्मत्वं तत्रैव द्वितीयायाः शक्तिः सविषयवाचिधातुसमभिव्याहृतद्वितीयायास्तु विषयत्वादिरूपे गौणकर्मत्वे लक्षणेति ये नैयायिका वदन्ति तान्प्रतीत्यर्थः अनित्यादिति चैतत् ननु सुपां कर्मादय इति भाष्यप्रामाण्यात्सिद्धमनुपां शक्तिः कर्मादौ विषयत्वादौ लक्षणा या त्तु कथमस्य वाचकत्वं तद्धायस्मादनेनाप्रतिपादनादित्याशंक्य तदुत्तरार्द्धं प्रदर्शितनियमं वाचकत्वे नोपदर्शयन्नाशयं प्रका

एवं च देवदत्तस्य गोब्राह्मणाय गेहाद्धस्तेन गंगायां मयादियत इत्यदेवदत्तसंबंधिगवाभिन्नाश्रयकत्यागानुकूलो ब्राह्मणोद्देश्यको गेहावधिकविभागजनको हस्तकरणको गंगाधिकरणको मन्निष्ठो व्यापार इति बोधः यथायथं उक्तप्रकारेण अत्रमानमुपदर्शयन् घटं जानातीत्यादौ द्वितीयाया विषयतायां लक्षणेति वदन्तो नैयायिकान्प्रत्याह सुपां कर्मेतीति अयं भावः सुपां कर्मादयोऽप्यर्था संख्यावदेव तथा तिङां प्रसिद्धो नियमस्तन्नि
यमः ॥

शयति अयंभाव इत्यादिना स्वौजसमौडिति सूत्रे कारकविभक्तिषु आद्यद्वितीयाया उपादानात् तदर्थस्य कर्मणः श्लोकवार्त्तिकेऽप्यथममुपन्यासः कर्मादित्यादिना कर्त्रादिपरिग्रहः अपिना शक्तिः कारकमिति पक्षे कर्मत्वादि समुच्चीयते तथा तिङामिति कर्मादयोऽप्यर्था इत्यर्थः अत्रापि नाभावकालपरिग्रहः तत्रेति सप्तमि ङविभक्तिष्वित्यर्थः ॥ ॥ ॥।

प्रकृतेष्विति प्रयोगेष्वित्यर्थः तद्वाधेति लोकादेव बहुत्वादिषु वचनादीनां व्यवस्था भविष्यतीति किमर्थं बहुषु बहुवचनमि
त्यादि सूत्रमिति प्रश्नोऽस्तु नियमविशेषेण विधानादृष्टविप्रयोगत्वात्सूत्र नियमार्थं वचनमिति समाधायनियमाकारं प्रदर्शि
कामिदं बहुष्विति सूत्रे श्लोकवार्त्तिकं प्रयुक्तवाप्रकृतार्थानपेक्षानियमः केचप्रकृतनायकत्वादयः एकस्मिन्नेवैकवचनं
न द्वयोर्न बहुष्वित्यादि च तद्वाधितताभ्यामित्यर्थः नियमलाभप्रकारमाह तथाहीति द्वितीयाकर्मण्येवेति प्रकृता·
प्रकृतेष्वेवेति वार्त्तिके तद्वाध्याभ्यां कर्मादेर्वाच्यतायास्तन्नियमस्य च लाभः तथाहि स्वौजसमौट् कर्मणि द्वितीया
द्व्येकयोर्द्विवचनैकवचने लः कर्मणि लस्थतिपूनमूकिनाम्येकवचनादि वचनेन्यादेरेकवाक्यतया कर्मादेस्तत्स·
ख्यायाश्च वाच्यता लभ्यते तथा तन्नियमश्चाहिविधौ लभ्यते तथाहि स्वौजसमौट् कर्मणि द्वितीया तिस्रश्च द्विवि·
धौ लभ्यते द्वितीया कर्मण्येव तृतीया करण एवेत्यादिरर्थे नियमः कर्मणि द्वितीयैव करणे तृतीयैवेत्येवं शास्त्रनि
यमस्य उभयथापि सिद्धनियमविरुद्धं लक्षणादिकमसाधुत्वप्रयोजकमिति याज्ञे कर्मणि नात्र तत्वेदेदिति निषेध·
विषयो भवत्येवेति स्वेच्छया लक्षणापि विभक्त्या वप्रयोगितिकेव अत एव विभक्तौ न लक्षणेति तैयायिक हद्दानां व्यव
भिप्रायं निकृष्ट नियमस्यतु एकत्वविशिष्टे कर्मण्येव द्वितीयैकवचनमित्यादिराकारो बोध्यः एवमत्र तत्रापि उभयथापी
ति विभक्त्यापेक्षयार्थापेक्षया चेत्यर्थः सिद्धिरस्यैकवाक्यतानाम्युपगमेत्यादिः निषेधविषयः इति विषयत्वाद्यर्थकत्वस्य द्वि
तीयादेः शास्त्राप्रतिपाद्यत्वात्तदर्थप्रतिपादनाय तत्र उच्चारणस्यान्तरत्वादित्यर्थः अत एवेति एकवाक्यतानावलंबितादिति

शा॥

यमादेर्व्याख्या॥

मू॰
सा॰ द॰
११२

ननु घटं जानातीत्यादौ धात्वर्थफलाश्रयत्वरूपमुख्यकर्मत्वस्य बाधेन द्वितीयया तत्प्रतिपादनासंभवाद्विषयत्वरूपे गौणकर्मत्वे नि
रूढलक्षणा वक्तव्या की दृशोऽकर्मोदयस्तत्र गौणमुख्ययोरुभयोरपि कर्मपदेन बोधनाच्च न तद्विरोप इति तेन तस्मान्न नवद ननिषेधवि
षनेत्यतस्त्राह दिगिति तदर्थस्तु मुख्यकर्मत्वयादायशास्त्रचारितार्थ्ये गौणार्थप्रतिपादनपर्यन्ते शास्त्रव्यापारकल्पने मानाभा
वः जानात्यादीनां विषयत्वापन्नपसर्जनविषयत्वापादनापर्यकतया तादृशफलाश्रयत्वस्य मुख्यकर्मत्वस्य तत्राबाधेन र
लक्षणां विनाप्याजस्येन द्वितीयोपपत्ते लक्षणाकल्पिकायाश्च नयपत्तेरभावाच्च त्वान्नभवैकगम्ये लक्षणाभ्युपगमे र्थैनि

इतिदिक् ॥

द्देशस्य वैयर्थ्यापत्ते स्तन्निर्देशस्यान्यार्थः साधुत्वफलकत्वबोधनात् अन्यथानुशासनवैयर्थ्यापत्ते स्वेत्यादि अत्रेद
मवधेयं नैयायिकमते शक्तिः कारकमिति भाष्यारूढपक्षाश्रयणेन जानात्यादीनां विषयबोधसर्जनज्ञानरूपव्या
पारार्थकतया विषयत्वाश्रयत्वरूपमुख्यकर्मत्वस्य घटादावबाधेन द्वितीयादीनां मुख्ये हस्तैवाश्रयत्वादिबोध
कत्वसंभवात्तन्मते युक्तनियमविरोधो नापि तासां तन्मरतायां निषेधविषयतेति रहस्यं ॥ ॥

इति भूषणसारदर्पणे सुबर्थनिर्णयः ॥ सुपामाकृत्यर्थत्वेन नामार्थस्य स्फुटत्वात्प्रसंगसंगत्या नामार्थं निरूपयन्नित्याशयवानाह
नामार्थमिति जातिरिति तज्जन्यदार्थासाधारणो धर्म इत्यर्थः तेनाकाशाभावत्वादीनां नित्यानेकसमवेतत्वरूपजातित्वाभावे
ऽपि न क्षतिः तस्यैव शास्त्रे स्वार्थपदेन व्यवहारः संख्यातिपदिकं तस्यार्थस्तज्जन्यबोधप्रकार इति व्युत्पत्तेः एतस्मिन्प्रमाणं वाजप्या
यनमेकस्मिन्वचनमस्मिन्नरूपाणामिति सूत्रे सर्वासामेव ग्रहणमपरिभाष्यमाकृतिग्रहणात्सिद्धमिति वार्त्तिके आकृति
ख्यापायन इत्यादिसूत्रभाष्यं च लाघवेनेति एकस्यां तासां शक्तिस्वीकारप्रयुक्तेनेत्यर्थः ननु शक्तिग्राहकमुख्ये
न व्यवहारेण व्यक्तावेव शक्तेः परिच्छेदात्कथं जातौ वाच्यतेत्यत आह अनेकव्यक्तीनामिति व्यवहारेण तज्जातिविशिष्टशक्तिग्रहे

इति भूषणसारे सुबर्थनिर्णयः नामार्थमाह एकं द्विकं त्रिकं चाथ चतुष्कं पञ्चकं तथा नामार्था इति सर्वेऽमी पक्षाः
शास्त्रे निरूपिताः एकं जातिः तस्या एव लाघवेन वाच्यतौचित्यात् अनेकव्यक्तीनां वाच्यत्वे गौरवात् ॥

व्यक्तीनां तासामपि यावतीभूतनक्षत्रासंभवात्तत्तदाश्रयभेदभिन्ननानाशक्तिकल्पने गौरवाच्चेत्यर्थः एकव्यक्तिविषयकशक्तिज्ञानाद
परव्यक्तिविषयकबोधासम्भवात् गोव्यक्तिविषयकशक्तिग्रहाद् घटविषयकबोधापत्तेः तद्व्यक्तिविषयकशक्तिज्ञानस्य
तद्व्यक्तिबोधहेतुतायाश्चावश्यकल्पनीयत्वेन एकव्यक्तिविषयकशक्तिग्रहादपरव्यक्तिबोधानुदयापत्त्या सकलव्यक्तिभानार्थं
तावद्व्यक्तिषु शक्तिकल्पनायां गौरवस्य स्फुटतया जातावेव शक्तिकल्पनौचित्यात् यद्यपि गोपदशक्य इति शक्तिग्रहो व्यक्तिविष
यकोऽपि न तथापि सविशेषणे विधिनिषेधौ विशेषणमुपसंक्रामतः सति विशेष्ये बाधे इति न्यायेन नागृहीतविशेषणान्यायप्र
वृत्तेन तादृशशक्तिग्रहो जातावेव शक्तिं गमयति यद्वा जातिविशिष्यकप्रवशक्तिग्रहो गौर्गोपदशक्य इति जातिशक्यत्ववाचि एवमेवाभिलापात् व्यक्तिभानस्य तु

मू॰
सा॰ द॰
११२
113

विनिगमनेति एकतरपक्षपातिनी युक्तिर्विनिगमना तदभावइत्यर्थः तथाच सकलव्यक्तिभिः साकं जाते लाघवरूपविनि
गमकसत्वेपीयं व्यक्तिः शाब्दोत जातिरिति रीत्यामनेकव्यक्ताशक्तिग्रहे विनिगमकाभावइत्यर्थः जातिशक्तिवादे लाघ
वं दर्शयति एवंहीत्यादिना उक्तपक्षे कव्यक्तिशक्तिज्ञानादन्यव्यक्तेर्भानासंभवात् ज्ञानार्थे स्वसमवेताश्रयत्वरूपलक्ष
णापेक्षया जातिशक्तिवादे स्वाश्रयत्वरूपलक्षणाकल्पने लाघवमित्यर्थः लाघवमिति तथाच व्यक्तिशक्तिवादे

नचैवं व्यक्तीनां प्रत्येकमेकत्वाद्विनिगमनाविरहइति वाच्यं एवंहि एकस्यामेव व्यक्तौ शक्त्यभ्युपगमे व्यक्त्यंतरे
लक्षणायां स्वसमवेताश्रयत्वं संसर्गइति गौरवं जात्यांतु स्वाश्रयत्वमेव संसर्गइति लाघवम् किंचैवं वि
शिष्टवाच्यत्वापेक्षया ॥

गौरवमनन्तत्वाद्ग्रहेपइति भावः ननु गवादिपदस्य गोत्वादौ गवादौ च वृत्तिद्वयकल्पनापेक्षया विशिष्टे शक्तिक
ल्पनमेवोचितं तथाच नाशकस्य शाब्दविषयता संगोपि गोत्वे नानागनातीतासन्निकृष्टव्यक्तिषु शक्तिग्रहस्य सूप
पादत्वमाह किंचैवमिति अपेक्षयेत्यनेनैतमपक्षे गौरवं पनयति ॥ ॥

१॰१२

नागृहीतविशेषणेति नागृहीतविशेषणा बुद्धिर्विशेष्यमधिगच्छतीति न्यायशरीरं विशेषणविषयकबुद्धिर्विशेष्यं
नावगाहत इति तदर्थः अस्मिन्निबाधके विशेष्यविषयत्वस्य विशेषणविषयकत्वनियतत्वमिति यावत् तथा च विशिष्ट
शक्तिवादिमते विशिष्टशक्तिग्रहस्य विशेषणविषयकत्वस्यावश्यकतया उभयविषयकत्वेन शक्तिग्रहस्याग्रहे बोधोपयो
गिनामपीत्यनानतिविषयकशक्तिज्ञानत्वेनैव तद्धेतुत्वमुचितमिति लाघवाज्जातौ शक्तिकल्पनैव ज्यायसीति भावः ननु
वं गां दद्याद्व्रीहीनवहन्तीत्यादौ जातिशक्तिवादे कथं कर्मत्वान्वयः व्रीह्यादिपदार्थस्य जातेरवघातादिकर्मत्वायोग्यत्वात्

नागृहीतविशेषणान्यायाज्जातिर्विवाच्येति प्रकृते व्यक्तिबोधस्तु लक्षणया एवं च तत्र विभक्त्यर्थान्वयोऽप्युपपद्य।
त इति दिक् यद्वा केवलव्यक्तिरेवैकशब्दार्थः ॥

अत्र केचित् जात्याक्षिप्तव्यक्तौ दानावघातादिकर्मत्वान्वय इति तत्र प्रत्ययानामिति नियमस्तत्रैव प्रकृत्यर्थव्यक्तौ तदन्वयासंभ
वात् तदुक्तेर्गम्यमानस्य चार्थस्य नैव दृष्टं विशेषणं शब्दान्तरैर्विभक्त्या वा धर्मो यत्स्खलतीति वदन्ति किं चायमाक्षेपो यद्यर्थाप
त्तिः समानवित्तिवेद्यत्वं वा नाद्यः अनुपपत्तिमन्तरेणापि गौरस्तीत्यतो गोत्वविशिष्टबोधदर्शनात् नान्त्यः स च ज्ञा
तिविषयकशक्तिग्रहस्य विशिष्टव्यक्तिबोधहेतुत्वाभ्युपगमेन जातिविषयताया व्यक्तिविषयत्वनैयत्यरूपो वाच्यो
तस्यासंभवात् स च गोत्वमस्तीत्यतो गोत्वविशिष्टप्रत्ययाद्व्यभिचरित इति कथमेतन्न्यायसमर्थनमत आह ॥

व्यक्तिर्वोपस्थितेति लक्षणयेति स्वशक्याश्रयत्वसंबंधरूपलक्षणयेत्यर्थः तथाच व्यक्तेरशक्यत्वेपि लक्षणोपस्था
तदुपस्थितिसंभवात्तत्रानयनादिकर्मत्वाद्यन्वयापत्तिरिति भावः उक्तदोषमुद्धरति एवंचेति तत्रलक्षितव्यक्तौ
उपपद्यतइति अन्वयोव्यक्तेरप्रकृत्यर्थत्वात्तत्र विभक्त्यर्थसंख्याकारकाद्यन्वयो नोपपद्यत एवस्यात्तत्पदानामिति
कुत्सितेरिति भावः नत्वस्मिन्पक्षे व्यक्तौ लक्षणाभ्युपगमेन व्यक्तिभाननिर्वाहेपि युगपद्वृत्तिद्वयकल्पने सिद्धां
तव्याकोपः किंच गोरस्त्रीत्वादिवाक्यादनुभूयमानगवादिवोधानुपपत्तिः तद्वाक्यार्थजातावस्त्रत्वाद्यर्थस्यान्वया
वादेन तदनुपपत्तेर्लक्षणावीजस्याभावादित्यतआह दिगीति तदर्थस्तु सति तात्पर्ये गंगायां घोषमत्स्योर
स्तइत्यादौ वृत्तिद्वयस्य सर्वैरेव ग्रंथकृद्भिरभ्युपगमे न ताद्दृशसिद्धांतस्यैवाभावात् तदभ्युपगमे जातिव्यक्त्यो
रभेदपक्षमवलंब्य विभक्त्यर्थान्वय उपपादनीयः तदुक्तं तेन तल्लक्षितव्यक्तेः क्रियासंबंधबोधनात् जातिव्य
क्तोरभेदो वा वाक्यार्थे ध्रुवमवस्थित इति मास्तु वा व्यक्तेर्भानं आनयनादिक्रिया केवलायां जातावसंभवती व्यक्ति
साहित्येन निष्पाद्यते तदुक्तं तद्धितार्थेति सूत्रे स्वरूपसूत्रे च भाष्ये आकृतावालंभनादीनां संभवो नास्तीतिव्य
त्वात् तत्सहचरिते द्रव्ये भविष्यति यथाग्निरानीयतामित्युक्ते केवलस्याग्नेरानयनासंभवादचोदितमपि पात्रमा

नीयते एतदेवाग्रे रान यनेयन्नात्र स्यास्य नयावाकृतावालं भनादीनि प्रयोयमानानि सामर्थ्यात्तादृचवर्ण्याहूतमभिनिवि
शंते सर्वे पवाहृतेयो गोत्र भौविनहृ व्यायाइति हृब्यहारकः संबंधः सेपयतइति साहचर्यौ संबंधः हारएणप्ययमर्थो
यक्तैकार्ष्याएगोसे स्पष्टाजाति स्तुप्रतिपयनइत्यादिना स्फुटीकृतः गोत्वादिपदे च धर्मो जातिरेचन नु निधर्मे च गोत्वा
दिपदानां शक्तिरिति ननत्र गोविशेष्यको बोधः स्वप्रवाशक्तिग्रहविशेष्यत्वाद्व्यक्तेर्भाने व्यक्तिशक्तिवादे वच्छेदकतया जाति
भानवत् न तु जातौ व्यक्तौ च शक्तिरुभयत्रतत्कल्पने गौरवात् नापि व्यक्तौ तत्र शक्तिकल्पने जातौ तदवच्छेदकत्वकल्पनगौ
रवात् गानेराश्रयावियोगेपि केवलायास्तस्याः शक्याद्ववाच्यत्वं जलादौ दृश्यमानस्य मधुरत्वस्य तस्यानाद्वियोगेपि मधुरत्वप
दवोध्यत्ववत् शक्यतावच्छेदकत्वं तु जातिगतधर्मस्यैव अभेदवादे शक्यगताजातिर्वेति विनापि संकेतविषयतां सा
मान्ये संबंधनियमादर्थोपस्थापकत्वाये नोपस्थितां व्यक्तिं पुनर्जातिर्विशिनष्टि रूपादिसामाविषयालं चक्षुरादीनां चा
क्षुषयामीत्यनव्यवसाये न विषयीकरणवदित्यपि केचित् पकस्य प्रवाहे संबंधस्य तीरत्वयोरभावाद्बुकासंब
यरूपलक्षणायायकस्यालक्ष्यतावच्छेदकयोर्निर्वक्तुमशक्यतयालक्ष्यतावच्छेदकाविशिष्टे लक्षणायाश्च नेगीकारेण
गंगायां घोषइत्यादौ हक्षुनपस्यापि तस्यापि तीरत्वस्य शाब्दवोधे भानवदनुकृतावच्छेदकेशक्यभावेपि ताहशाकार्यकार
णभाववलादेव गोत्वादिभानति र्वाहे कृते तत्र शक्तिकल्पनये त्याशयेनैक शब्दमन्यथाव्याचष्टे यद्वेति व्यक्तिरेवेत्य

वकारेणजातिव्यवच्छेदः ।।

मू॰
सा॰ द॰
११५
115

नन्वपूर्वकल्पे सवर्णग्रहणमपरिभाष्यमित्यादिप्रामाण्यादलस्य यत्नो व्यक्तिः पदार्थ इत्यत्र तत्किं प्रमाणमत आह
केवलव्यक्तीति एकशेषस्य चेति जातिशक्तिपक्षे एकेनैव शब्देन द्वयोर्बहूनां वा प्रत्यायनसंभवात्तदनर्थकं स्याद्व्यक्ति
पक्षे ज्ञापनेन चरितार्थमित्यर्थः अणुग्रहणस्य भाष्यकृता प्रत्याख्यानात्तत्सूत्रस्य च शास्त्रीयप्रक्रियामा
त्रोपयोगित्वस्याकरे व्यवस्थापनात्तयोरत्र प्रामाण्यमत आह युक्तं चैतदिति सयुक्तिकमप्येतदित्यर्थः अपि
नादद्वयाभिधानेनाडिदिति भाष्यप्रामाण्ये समुच्चयः युक्तिमेवाह व्यवहारेणेति एतन्नवेशक्तिवादे वक्ष्यते

केवलव्यक्तिपक्ष एवाणुग्रहणस्यैकशेषस्य चारंभेण तस्यापि शास्त्रसिद्धत्वात् युक्तं चैतत् व्यवहारेण
व्यक्तावेव तद्ग्रहणात् संबंधितावच्छेदकस्य जातेरेकत्वाद्व्यक्तिरप्येकैवेति न गौरवं ॥

एतत्कस्य जातिवादयत्नोक्तेः शङ्काया अन्यदोषं परिहरति संबंधितावच्छेदकस्येति सकलशक्यानुगतस्येति शेषः अ
त्र जातेर्विधेयतया ननु लिङ्गकत्वे संबंधितावच्छेदकपदस्य तथा च गोत्वाद्यननुगतीकृतनानाव्यक्तिष्वेकधर्मावच्छि
न्नायाः एकस्या एव शक्तेरुपगमात्तन्नानात्वप्रयुक्तगौरवदोषावकाश इति भावः एवं शक्तेरनुगतधर्मावच्छिन्न
त्वाभ्युपगमे गोत्वाभ्युपगमे गोत्वादेर्गवादिनिष्ठशक्यतावच्छेदकत्वांगीकार
इति यावत् वाच्यमिति शाक्यमित्यर्थः ॥

शक्यतावच्छेदकत्वादिति शक्यत्वे सति शक्यविशेषणस्यैव तदवच्छेदकतया तत्र तदनंगीकारे तदवच्छेदकत्वासंभवादिति भा
वः न्यायादिति यत्तत्सहकृतत्वसविशेषणे हीति न्यायादित्यर्थः तदेवेति घटत्वादिकमेवेत्यर्थः एवकारेण व्यक्तिव्यवच्छे
दः अकारणेऽपीति दंडत्वादीनामिति एतावद्व्यवहितपूर्ववर्त्तित्वेऽप्यन्यथासिद्धतया कारणत्वात् तीरत्वादीनां चोक्तप्रकारेण
लक्षणत्वात्तन्निष्ठविशेष्यतानिरूपितविषयताविशेषरूपं स्वरूपसंबंधरूपं वावच्छेदकत्वं स्वीकरणीयं न तु भवद

न चैवं घटत्वमपि वाच्यं स्यात् शक्यतावच्छेदकत्वात् तथा च नागृहीतविशेषणन्यायात्तदेव वाच्यमस्त्विति शंक्यम्
अकारणेऽपि कारणतावच्छेदकत्ववद् लक्ष्यतावच्छेदकत्ववद्वा शक्यत्वे तस्यापि संभवात् उक्तं च आनंत्येऽपि
हि भावानामेकं कृत्वोपलक्षणं शब्दः सुकरसंबंधो न च व्यभिचरिष्यतीति ॥ ॥

न्तरूपं मानाभावादिति भावः उक्तं चेमस्याः रूपणाधिकरणे भट्टपादैरिति शेषः आनंत्येऽपीति भवानां व्यक्तीनामानंत्या
द्यपरिच्छेद्यत्वेऽपि एकं अनुगतजात्यादिधर्मं उपलक्षणं कृत्वा अशक्यत्वे सति शक्यव्यावर्त्तकं शक्यतावच्छेदकतया आभ्यु
पगम्य शाब्दो गवादिनामस्वरूपः सुकरसंबंधः सुग्राह्यः गवादिनिष्ठवाच्यतासंबंधः न चेति शक्तिग्रहाविषयव्य
क्तिं न बोधयिष्यतीति तदर्थः गोत्वादिसामान्यलक्षणया सर्वासां व्यक्तीनामुपस्थापनादिति भावः यत्तत्पक्षे वजा

भू॰
सा॰ द॰
११६
116

तिविशिष्टव्यक्तिशक्तिग्रहस्यकारणत्वाभ्युपगमात्तज्जातिमात्रानुपपत्तिः स्वार्थोद्रव्यंचलिंगेचेत्यादौव्यक्तिरेवद्रव्यमि
त्यभिधीयतेअन्तेचविशेष्यत्वेनविवक्षितत्वंसर्वनामपरामर्शयोग्यत्वंवा उक्तंच वस्तूपलक्षणंयत्रसर्वनामप्रयुज्यते
द्रव्यमित्युच्यतेसोऽर्थोभेद्यत्वेनविवक्षितइति इदंतदितिसर्वनामपरामर्शयोग्यंद्रव्यमित्याद्यवाक्यार्थः लक्षणां
तरं भेद्यत्वेनेतिविशेष्यत्वेनेत्यर्थः यत्तुछत्रणस्यपक्षेजात्यादेरपिविशेष्यत्वविवक्षायांद्रव्यत्वमिष्टमेव तिङन्ता
र्थक्रियायाःकिमादिभिः परामर्शात्तोकमित्यादिभिर्विशेषणत्वाच्चद्रव्यत्वमेवविप्रतिषिद्धमित्यादौसामर्थ्यात्तत्रोन
रप्रसिद्धग्रहणे शाक्यतावच्छेदकंचशक्यनिष्ठविशेष्यतावच्छेदकतयाभासमानत्वंघटादिपदशक्तिग्रहेचघटत्वादे
रेवतत्त्वंनद्रव्यत्वादेरितितेभ्योनद्रव्यत्वादिबोधःद्रव्यादिपदाच्चनघटत्वादिप्रकारकोबोधः अतएवाकाशपदस्य
शब्दाश्रयत्वेशक्त्यभावेऽपिनतत्तद्रूपेणैवबोधः तद्विशिष्टविषयकशक्तिग्रहस्यतद्बोधहेतुत्वादितिचिन्तामणावु
क्तं यद्वा आकाशत्वमखण्डोपाधिर्हीतिसूत्रोक्तकेयत्रोक्तरीत्यातत्तद्रूपंवाऽऽकाशपदशक्यतावच्छेदकमिति
नाकाशःशब्दाश्रयइतिप्रयोगानुपपत्तिरितिकेवलद्रव्यवादमतनिष्कर्षः ॥ नन्वेतत्पक्षद्वयमपिनवि
चारसहं तथाहि जातिशक्तिवादेगोत्वादिपदाज्ज्ञातत्वविशिष्टबोधापत्तिःगोत्वशक्तिग्रहस्यतद्विशिष्टबोधो

पयिकस्य सत्वात् न च निरूढधर्मितावच्छेदककशक्तिग्रहेण गोत्वविशिष्टबोधे हेतुर्गोत्वत्वधर्मितावच्छेदकशक्तिग्रहस्य गो
त्वत्वेन गोत्वोपस्थितौ शाब्दबोधे च हेतुरिति नोक्तापत्तिरिति वाच्यं गोत्वं न गोपदशक्यमिति गोत्वत्वधर्मितावच्छेदककबोध
ग्रहकाले निरूढधर्मितावच्छेदककशक्तिग्रहसंभवेन गोत्वविशिष्टबोधापत्तेर्गोत्वत्वधर्मितावच्छेदकशक्तिग्रहस्य तादृशबो
धहेतुताया आवश्यकत्वात् यदि च गोत्वे निरवच्छिन्नैव शक्तिः गोपदं गौरित्याकारकशक्तिसंबंधेन गोत्वप्रकारक
गोपदत्वविशिष्टविशेष्यकशक्तिज्ञानं गोत्वविशिष्टबोधहेतुरिति नोक्तबोधकाले शाब्दबोधापत्तिः गोपदं गोत्ववदि
ति गोत्वत्वेन गोत्वप्रकारकशक्तिज्ञानं च गोत्वविशेष्यकशाब्दबोधे हेतुरिति न पूर्वोक्तज्ञानाद्गोत्वविशिष्टबोधापत्तिरिति
विभाव्यते तदापि कदाचिद्गोपदात्समवायेन गोत्वविशिष्टबोधः कदाचित्कालिकादिसंबंधेनेति नियमानुपपत्तिः
गोत्वविषयकशक्तिज्ञानस्याविशिष्टत्वात् तन्मते तु समवायेन गोत्वविशिष्टविषयकशाब्दबुद्धिं प्रति समवायेन गो
त्वविषयकशक्तिग्रहस्य कालिकादिसंबंधेन तद्विशिष्टविषयकशाब्दबोधं प्रति तेन संबंधेन गोत्वविशिष्टविषय
कशक्तिग्रहस्य हेतुत्वेन तन्नियमोपपत्तेः गोपदं गौरित्याकारकशक्तिग्रहस्य शाब्दबोधहेतुतानुभवाच्च व्य
क्तिवादे च सर्वेषां पदानां व्यक्तिमात्रबोधकत्वेन गोश्वलोहित्यरक्तादीनां सह प्रयोगानुपपत्तिः किं च हस्तिपकव्यक्त्यं
तरे संबंधग्रहे यत्र हस्तिपके स न गृहीतस्तस्यापि हस्तिदर्शनेन स्मरणापत्त्या तद्व्यक्तिविषयकसंबंधग्रहस्य तदुप
स्थितिनियामकत्वस्यावश्यकतया कथमेकविषयकशक्तिज्ञानादपरव्यक्त्युपस्थितिः ॥

भू॰
सा॰ द॰
११८

सामान्यलक्षणाख्यायानतरमणीयेवेत्यभिप्रायवानाह वस्तुतस्त्विति विशिष्टमिति जात्यादिविशिष्टाव्यक्तिर्व्यक्तिविशि
ष्टाजातिश्चेत्यर्थः यद्यपि नह्याकृतिपदार्थकस्य द्रव्यं न पदार्थो द्रव्यपदार्थकस्य चाकृतिर्न पदार्थ इति उभयोरुभयं
पदार्थ इति भाष्यादिप्राकलितयोरेव जातिव्यक्त्योः शक्तिग्रहविषयता लभ्यते तथापि कस्यचित् किंचिद्गुणभूतं
किंचित्प्रधानमित्युत्तरभाष्ये उपसंहारपर्यालोचनया विशिष्टे शक्तिनिर्णयात्तथोपादानमविरुद्धम् अन्यथा
त्वत्तीयोपात्तकरणत्वैकत्वयोरिव विशेष्यविशेषणभावानापन्नजातिव्यक्त्योः शक्यत्वे गोत्वं व्यक्तिश्चेति गोप
दात्समूहालम्बनबोधापत्तेः अत एव पाठ्यापि विशेष्यविशेषणभावापन्नानां शक्तिग्रहे भानं तादृशानामेव शाब्द

वस्तुतस्तु नह्याकृतिपदार्थस्य द्रव्यं न पदार्थ इति भाष्याद्विशिष्टे शाक्तं

बोधे भाननियमात्फलविशिष्टव्यापारस्य धात्वर्थत्वे कर्माख्याते फलस्य विशेष्यतयाभानानुपपत्तिमाशंक्याह फ
लविशिष्टे व्यापारे विशिष्टे फले वा धातोः शक्तिरित्यभिप्रायेणान्ते वा फलव्यापारौ ष्ठपृथगेव धात्वर्थौ वि
क्तमाख्यातवादे दीधितिकृद्भिः एकपदीयपृथक्शक्त्युपस्थाप्ययोरपि परस्परमन्वयोपगमे हरि
पदाद्युपस्थाप्यपौरस्त्यसूर्यादीनामपि प्रभावेनान्वयबोधापत्त्या पदार्थानां विशेष्यणभावेनान्वये
विभिन्नपदजन्योपस्थितेस्तन्त्रत्वाव्यापकतया तयोरनन्वयापत्तेश्च अत्पत्यितिनरोपगमेत्वतीवगौरवम्

११८

वमेवावयवसंयोगीरूपाकृतौ न हैशिष्ट्ये व शक्तिरिति गवादिपदाज्जात्याकृतिविशिष्टबोधोपपत्तिः तथा च सूत्रितं गौणत्वे जात्या
कृतिव्यक्तयः पदार्थ इति विषयत्वैकैव शक्तिरिति सूत्रतात्पर्यं च पदार्थ इत्यत्रैकवचनं गुणभूतमिति भाष्यस्वारसिकतर
येति शेषः कदाचित्तस्य प्राधान्येन भानं तत्तात्पर्यग्रहसापेक्षमिति न दाशयः जातेः प्राधान्येऽपि द्रव्येऽपि द्रव्यसंख्यामादा
यद्विबहुवचनाद्युपपत्तिस्तदुक्तं कैयटेन यथा भवत इत्यादौ क्रियाप्राधान्येऽपि साधनसंख्याकृतो वचनभेद एवमाकृ
तिप्राधान्येऽपि द्रव्यसंख्याकृत इत्यदोष इति द्रव्यप्राधान्येऽपि क्वचिज्जातिसंख्यामादायैकवचनं यथा न ब्राह्मणं हन्यादित्या
दौ जातेः प्राधान्ये च निरवच्छिन्नायायव्यक्तेः प्रकारताविशेष्यीभूतजात्या चानुगम प्रकारीभूतमेवानुगमक
मित्यत्र मामाभावादिति भावः वस्तुतस्तु जातिविशिष्टव्यक्तिरेव शक्या गवादिपदाज्ज्ञाविशिष्टमोत्वविशेष्यकबोर
पस्यानुभवात् गोत्वस्यान्वयितावच्छेदकरूपेणानुपस्थित्या न तत्र कर्मत्वाद्यन्वयासंभवाद्बाधाच्च संपन्नो व्रीहिरि
त्यादौ तु स्वप्रकृत्यर्थतावच्छेदकवत्त्वसंबंधेन प्रकृत्यर्थप्रकारो वैवैकत्वान्वयः उक्तस्थले एकवचनोपस्थितानि नानैक
तानि नानाव्रीहिष्वन्वीयंत इति तु मसत् सजातीयनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वरूपस्य जातीयद्वितीय
रहितत्वस्यैकवचनार्थत्वेन तत्र तस्य बाधात् एकत्वमात्रस्य वस्तुमात्रसाधारण्येनार्थतया लाभादनुपयोगाच्च नत्वै
कवचनार्थत्वेन तत्र तस्य बाधात् एकत्वमात्रस्य वस्तुमात्रसाधारण्येनार्थतयैव लाभदुत्वाभावाच्च अतएवपस्तुनाय

भू:
सा. द.
११८
118

नेनेत्यत्र तादृशैकत्वस्य विवक्षितत्वादनेकपशुकरणकयागान्नादृष्टसिद्धिः समभिव्याहृतपदार्थसंसर्गित्वविशिष्ट
प्रकृतपर्यन्तावच्छेदकरूपेणाविवक्षितत्वात्तत्र घटोऽस्तीत्यादौ घटनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वस्याप्रसिद्धिः एतद्दे
शविद्यमानघटनिष्ठप्रतियोगितानवच्छेदकैकत्वस्यैव तत्र बोधात्तस्य च प्रसिद्धत्वात् एवं च व्यक्तिविशेष्यकबोधाभ्युपगमे
ऽप्यनुपपत्तेरभावात्तस्य च तद्विशेष्यकशक्तिग्रहमन्तरेणासंभवात्तथैव गवादिपदानां शक्तिर्गोत्वविशिष्टविषयकशाब्द
बुद्धिं प्रति गोत्वविशिष्टविषयकशक्तिज्ञानत्वेन हेतुता व्यक्तिमात्रविषयकशक्तिग्रहस्य जातिमात्रविषयकशा-
क्तिग्रहस्य वा हेतुतायामुक्तदोषस्य दुरुद्धरत्वात् अस्येव उभयोरुभयं पदार्थ इति भाष्याज्जातौ व्यक्तौ च गवादिप
दानां शक्तिः किन्तु जातिविषयकत्वेन व्यक्तिशाब्दबोधे कारणं व्यक्तिशक्तिस्तु स्वरूपसती उपयुज्यते तत्पदाश
क्यस्यापि भाने घटादेरपि भानप्रसंगेन व्यक्तिशक्तिस्वीकारस्यावश्यकत्वात् अयमेव कुञ्जशक्तिवाद इति व्यव
ह्रियते तथा च गोत्वप्रकारकगोविशेष्यकबोधे गोत्वविशेष्यकगोपदशक्तिमती गौरित्याकारकशक्ति
ज्ञानं कारणं न तु गोत्वविशिष्टविषयकगोपदशक्तिमती गौरित्याकारकं गोत्वमस्तीत्यादौ तादृशगोत्वप्र
कारकज्ञानाभावान्न गोत्वविशिष्टबोधप्रसंगः व्यक्तिविषयकत्वस्य शाब्दबोधहेतुशक्तिग्रहेऽनपेक्षणा
दित्याहुः तदप्यापातमनोरमम् गोत्वविषयकगोपदशक्तिमती गौरित्याकारकशक्तिग्रहस्य गोत्ववि-

षयकत्वेन हेतुत्वगोत्वविषयकत्वस्य कारणतावच्छेदककोटिप्रवेशगौरवात् अथ मास्तु गोविषयकत्वनिवेशः तथा
पि गोपदशक्तिमती गौरिति शक्तिज्ञानस्य गोत्वप्रकारकत्वेनैव गोत्वविशिष्टशाब्दबोधं प्रति हेतुता व्यक्तिविषयता
याः कारणतावच्छेदककोटावप्रवेशेन विशेषात् दोषान्तरस्य व्यक्तिबोधानुपपत्त्या समानविशेष्यकत्वेन का
रणभावासंभवेन लाघवेन समानप्रकारकत्वेनैव कार्यकारणभावोपगमादिति चेन्नैवं व्यक्तिविषयतायाः का
रणतावच्छेदककुक्षावनिवेशे व्यक्तिशक्तिस्वीकारस्य वैयर्थ्यात् न च तदस्वीकारे गोत्वप्रकारकशक्तिज्ञानत्वे
न हेतुत्वासंभवः व्यक्तौ शक्त्यभावेन शक्तिज्ञानस्य भ्रमत्वापत्तेरिति वाच्यं शक्तिर्हि न स्वरूपसती शाब्दबोधहेतु
रपभ्रंशादपि शाब्दबोधोदयादगृहीतशक्तिकाच्छाब्दबोधप्रसंगाच्च किं तु ज्ञाता तथा च यदंशे शक्तिज्ञानं हेतुस्तदे
वशक्यमिति जातिवद्व्यक्तिवैशिष्ट्यांशे च शक्यमेव अन्यथा व्यक्तावेव शक्तिः व्यक्तिशक्तिज्ञाने च जातेरपि प्रकारत्वा
त्समानप्रकारत्वेनैव कार्यकारणभाव इति जातावपि शक्तिरुच्छिद्येत न च यद्विषयकत्वेन शक्तिज्ञानं तद
वश्यं शक्यमिति नियमाज्जातावपि शक्तिरिति वाच्यं तर्हि व्यक्तिविषयकत्वेनैव व्यक्तिशक्तिज्ञानस्य हेतुत्वे
न व्यक्तिशक्तिस्वीकारस्यावश्यकत्वात् कस्यचित्किंचित्प्रधाने किंचिद्गुणभूतमित्युपसंहारभाष्यविरोधा
च्चेत्यास्तां तावत् ॥ ॥ ॥

मू॰
सा॰ द॰
११५

119

नन्वेवं द्विकमिति यत्तस्योपपन्नावेकमिति यत्तस्य निरालंबनतापत्तिरित्यत आह एकमित्यस्य चेति शक्तिज्ञानस्येति
शाब्दबोधकारणीभूतशक्तिज्ञानइत्यर्थः तच्च गोपदं गोबोधकमित्याकारकं बोधकत्वे शक्तिरिति वादिमते तत्र
तादृशज्ञानविषयबोधे प्रकारितयावच्छेदकत्वमेव शक्तिः साच जातावेवेत्येकमिति यत्तस्योपपत्तिरित्यर्थः
तादृशज्ञानीयबोधप्रकारितावच्छेदकत्वे शक्तिरिति तयोरवच्छेद्यावच्छेदकभावस्वरूपहितानवहितभेदात्
मर्थनीयः दंडनिष्ठघटकारणतायाघटाव्यवहितपूर्ववृत्तित्वावच्छिन्नघटाधिकरणनिष्ठाभावप्रतियोगिज्ञान

एकमित्यस्य चायमभिप्रायः शक्तिज्ञाने विषयतयावच्छेदिका जातिरेकैवेति तथाच घटत्वविशिष्टबो
धे घटत्वांशेऽन्याप्रकारकघटत्वप्रकारकशक्तिज्ञानत्वेन हेतुतेति कार्य्यकारणभावइत्यादि ॥

वच्छेदकधर्मेयत्स्वरूपाया दंडत्वावच्छिन्नत्ववत् इतोपि शक्तेः पदार्थान्तरत्वमित्येकदेशिनः नन्वेतन्मते जातेः प्रका
रत्वेयैवमाने न तद्विशेषप्रयोजनाभावाज्जातिविषयकत्वेन शक्तिज्ञानस्य जातिविशिष्टव्यक्तिबोधहेतुतेत्याया
ते जातिविशिष्टव्यक्तिविषयकत्वेन हेतुत्वे कारणतावच्छेदककोटौ व्यक्तीनां वैशिष्ट्यस्य च निवेशगौरवात् न
थाच घटोऽस्तीत्यत्रेव घटत्वमस्तीत्यत्रापि घटत्वविशिष्टबोधापत्तिरत आह घटत्वांशइति उक्तस्थले च शक्तिर्हि ग्र
हस्य घटत्वस्य प्रकारत्वान्न तस्माद्घटत्वविशिष्टबोधापत्तिरिति भावः ॥ ॥

ननु तद्देशोन्यप्रकारकत्वे सति तत्प्रकारकत्वस्यार्थे समाजगुरुत्वात्कथं कार्यतावच्छेदकत्वमत आह प्रपंचि
तमिति तथा च निरवच्छिन्नप्रकारताकतद्विशिष्टबुद्धित्वावच्छिन्नप्रतीतिनिरवच्छिन्नप्रकारताकशक्तिज्ञानस्य तावच्छि
न्नप्रकारताकतद्विशिष्टबुद्धित्वावच्छिन्नं प्रति तत्तावच्छिन्नप्रकारताकतच्छक्तिज्ञानत्वेन हेतुत्वकल्पनात्रा उपपत्तिलेशो
पीति न त्वोक्तमित्याशयवसेयं शक्तिग्रहस्य गोत्वविषयकत्वे न हेतुतेति द्वयोरेव तादृशज्ञानाविषयत्वात्तु क्ता तमिति द्वि
कमिति पक्षस्योपपत्तिरित्याह तदभिप्रेत्येति तदिति विशिष्टविषयकत्वेन शक्तिज्ञानविशिष्टस्य हेतुत्वमित्यर्थः जा

प्रपंचितं भूषणे तदभिप्रेत्याह द्विकमिति जातिव्यक्ती इत्यर्थः पूर्वपक्षोक्तदोषपरिहारः पूर्ववत्त्रिकमिति॥

तीति विशेष्यविशेषणाभावापत्तेरित्यर्थः पूर्ववदिति कारणीभूतज्ञानविशेष्यत्वमेव तादृशज्ञानप्रका णीं
रत्वमेव वा शक्तिरिति मते पक्षे प्रातिपदिकार्थ इति पक्षः विनिगमनाविरहात्तादृशज्ञानविषयत्वमेव शक्ति मी
रिति मते विषयतायाः प्रकारविशेष्यभेदेन भिन्नत्वाद्विकमिति पक्षस्योपपत्तिरित्यर्थः एतेषां मतानामाकर आह
ढत्वेपि व्यक्तिः पदार्थ इति पक्ष एव क्षोदक्षम इति विभावनीयं सूरिभिः विस्तरस्त्वन्यतोवधार्यः लिंगानीति लिं
गत्वं च प्राह तद्गणगतो धर्मविशेषः स्त्रीपुंनपुंसकेषु लिंगमित्यनुगतव्यवहारात्तद्विशेषस्य स्त्रीत्वादीति दर्शय

८६

भू.
सा. द.
१२०

120

स्यामेवेति सूत्रतः सामान्येन पुंसकमिति तन्त्रान्तरोद्घोषः उत्कर्षापकर्षयोर्मतेपि साम्यावस्थाविवक्षायां नपुंसकमिति तद
र्थः तत्र स्त्रीत्वमिष्टं तिजात्याद्विसंख्यि तन शब्दनिष्ठेत्यर्थः अत एव पुल्लिंगः शब्द इति व्यवहारः तस्मात् स्त्रीणां नः सम्मोने पुंस
कादिति प्रामाण्यापाद्येति भावः तद्वाच्यमिति तत्त्रस्थवाच्यमित्यर्थ तमेवेति उपचयापचयावस्थारूपं परस्परसमाना
धिकरणं लिंगमादायैवेत्यर्थः भिद्यन्त इति लिंगलिंगकेतरव्याहृत्त्रिविधेपकारान्तमित्युदेश्याभवन्तीत्यर्थः तत्र
लिंगस्यापचयापचयावस्थारूपत्वे तासामवस्थानां परस्परविरुद्धत्वादेकत्रावस्थानासंभवादनेकलिंगकत्वव्यवहारः

जातिव्यक्तिलिंगानीत्यर्थः सत्त्वरजस्तमोगुणानां साम्यावस्था नपुंसकमुपचयः पुंस्त्वमपचयः स्त्रीत्वं तत्र
स्त्रीत्वं शब्दनिष्ठं तद्वाच्यं च तमेव धर्ममादाय तटादिशब्दाभिधेये तेकेषां विदनेकलिंगकत्वव्यवहारस्तत्समानानुपू
र्वीकत्वेन शब्दानामभेदारोपात् एवं च पदार्थपदे पुंस्त्वमेव व्यक्तिपदे स्त्रीत्वमेव वस्तुपदे नपुंसकत्वमेवेति सर्वत्र
वाच्यपदार्थद्वयं व्यक्तिरिदवस्तिति ॥

केषुचिच्छब्देषु किं निबंधनो त आह
केषांचिदिति तटादिशब्दानामित्यर्थः वस्तुत
स्तेषामेवैतर्ष्वपि शब्दानां समानानुपूर्वीकत्वनिबंधनाभेदाध्यवसायादनेकलिंगकत्वव्यवहारोपपत्तिरित्यर्थः स्वर्थेति स्त
नकेशवती नारी लोमशः पुरुषः स्मृत इति स्मृतिर्लक्षितं लौकिकं लिंगं तत्र लिंगप्रयुक्तकार्ये निमित्तं दाराणित्यादौ श
स्वरूपत्वर्थः स्तनादिशब्देष्वभावे ननु नानापत्तेरिति भावः एवं च पारिभाषिकलिंगस्य शब्दनिष्ठत्वाभ्युपगमे चेत्यर्थः ॥

१२०

व्यवहार इति अर्थनिष्ठत्वेन स्त्री व्यक्तिः पदार्थवस्तुपदाभ्यां न व्यवह्रियेत एवमग्रेऽपि स्तनकेशादिरूपलौकिकलिंगस्य खट्वाद्य
वभावे न तद्वाचकेखट्वादिशब्दे स्त्रीलिंगव्यवहारानुपपत्तेश्चेति भावः नटइति अन्यथा तदर्थेऽपि नाटशालिंगाभावेन तत्त्वलि
गप्रयुक्तकार्यस्यानुपपत्तिरिति भावः ननु शब्दनिष्ठस्य पारिभाषिकलिंगस्य नामार्थत्वेन तस्य लौकिकलिंगवदर्थापरि
च्छेदकत्वेन पशुना यजेतेत्यत्र पशुशब्देन पशुनिष्ठस्य वोक्तलिंगस्य प्रतिपादनान्नतो विशेषेण स्त्रीपुंसयोर्व्यक्त्यादिशब्दादिव
बोधसंभवात् पशुस्त्रिया विहितयागादप्यदृष्टसिद्धिः स्यादत आह नचेति पशुः स्त्रियां नास्तीति पश्वादिशब्देनोक्तन लिंगेन

व्यवहारः नटस्तटीतटमिति बोधप्रपद्यते नच लिंगमर्थपरिच्छेदकत्वेनान्वेति पश्वादिशब्देनोक्तं पशुः स्त्रियां ना
स्तीति पशुनेत्यादिविधिर्न छागपादीनेगतेन प्रयोजयतीति विभावनीय नचव्यक्त्यादिशब्देनोक्तलिंगस्येव पश्वादिशब्दे ॥
क्तस्यापि साधारण्येऽशे वक्ते व्यक्तिशब्दस्य नित्यस्त्रीलिंगत्वेन तथात्वसंभवेऽपि पशुशब्दस्य नित्यपुंलिंगत्वे प्रमाणाभा वात् ॥

तियोजना तत्पारिभाषिके शब्दनिष्ठलिंगे चेत्यर्थः अर्थपरिच्छेदकत्वेनेति व्यक्तिविशेषनिर्णयकत्वेनेत्यर्थः शब्दविशेषनि
ष्ठमेव तत्पागीयव्यक्तिविशेषनिर्णायकमिति पूर्ववत् पशुः स्त्रियां नास्तीति आदौ नास्त्रियामित्यनुशासनविहितनाभावस्य स्त्री
लिंगार्थकप्रकृतेः परस्य तृतीयैकवचनस्यासंभवेन तेन तदर्थस्य पुंस्त्वावगमात् पशुनेति विधिः पुंछागपादीनेवगमयतीत्य
कत्यर्थः ननु व्यक्त्यादिशब्दानामर्थनिष्ठलिंगानादरेण प्रवृत्तिवत् पशुशब्दप्रवृत्तौ बाधकाभावादुक्तदोषोऽपरिहर इत्याशयेना
शंकते व्यक्त्यादिशब्दोक्तेति आदिना वस्तुपदार्थशब्दसंग्रहः साधारण्येऽस्त्रीपुंसयवाच्यत्वसंबंधेन स्त्रीपुंसवृत्तित्वे स्त्रीनित्यस्त्रीलिंगत्वे

त्वेति स्त्रियां क्लिबत्वप्रसक्तव्यक्तिपदस्य नित्यस्त्रीलिंगप्रम
गमकत्वादिति भावः ॥

मू॰
सा॰ द॰
१२१

121

ननु पशुना यजेतेत्यादिवैदिकप्रयोगपर्वतस्य नित्यपुंलिङ्गत्वे प्रमाणं स्यादत आह पश्चेति वेदे दर्शनाच्चेति तथा च वेदे तस्य स्त्री
लिङ्गस्यापि दर्शनेन तस्य नित्यपुंस्त्वानिर्णयान्न नित्यस्त्रीलिङ्गव्यक्त्यादिशब्दवल्लिङ्गविशेषानादरेण तस्यार्थवाचकत्वाप्रवंच
पशुशब्दस्यानेकलिङ्गत्वेऽवगते यदि स्त्रीपशोर्यागाङ्गत्वं विवक्षितं स्यात्तदा स्त्रीलिङ्गमेव पशुपदमुपाददीत तदनुपादानात्तु
बोधकपशुशब्दोपादानाच्च भवति ततः पुंपश्वोरेव यागाङ्गत्वनिर्णयः शब्दानिष्टलिङ्गस्यापि पशुशब्दस्योक्तौ स्त्राश्रयवाच्यत्व

पश्चान्नपर्यंगस्त्रावरं तेन पश्चेन्द्र्यायथागवे इत्यादि वेदे दर्शनाच्च मीमांसायां च तत्र्यैं पशुना यजेतेत्यत्रैकत्वपुंर
स्त्वयोर्विवक्षितत्वान्नानेकपशुभिः पशुस्त्रिया वा याग इति प्रतिपादितत्वाच्च वस्तुतस्तु विशेषविधानभावेऽप्र
त्ययान्तानां पुंस्त्वं व्याकरणे निर्णीतत्वात्तद्भाष्येऽपि छन्दसि वा वचनमिति नाभावाभाव इत्युक्तेः पशुशब्दा
स्य नित्यपुंस्त्वनिर्णयात्प्रकृते नह्यगो वा मैत्रावरुणादिति ॥ ॥

स्वेदपेनान्वयात्रानुपपत्तिः पश्चोक्ते मीमांसकसंमतिमाह मीमांसायामिति वक्ष्यमाणस्वरसादाह वस्तुतस्त्विति
ननु प्रत्ययान्तानां नित्यपुंस्त्वे पश्चेत्यादिवैदिकप्रयोगानुपपत्तिरत आह वेदभाष्येऽपीति तथा च व्यक्त्यादिशब्दो
क्तलिङ्गस्येव शब्दोक्तस्यापि तस्य सापारणं दुर्वारमिति भावः निर्णयादिति तथा च साधारणत्वान्न तस्यार्था
परिच्छेदकत्वमिति भावः ॥

१२१

न्यायेनैवेति एवकारेणलिंगस्यपरिच्छेदकत्वमवच्छेदकः अयमुपलक्षणंसंदिग्धेवाक्यशेषादिन्यायस्ययथासारस्वतोमेसा
विस्यत्रतद्धितप्रकृतिशब्दस्त्रीलिंगः पुल्लिंगोवेतिसंदेहेसंदिग्धेवाक्यशेषादितिन्यायेनतद्दैवंमिथुनमित्यर्थवादाद्वयोरेवैकशे
षेणग्रहणंतद्दत्त्वापीतिभावः तत्रमंत्रवर्णे असंभावितमिति छागशब्देनस्त्रियांबोधनीयायांजातिवचनात्ततो
ङीषिततः षष्ठ्येकवचनेछाग्याइतिरूपस्यैवसंभवाच्छागशब्दस्यानेकलिंगत्वेपिलिंगविशेषविशिष्टशब्दोपादानसाम

न्यायेनैवनिर्णयः मंत्रवर्णेहिछागस्यवपायामेदसइतिश्रूयते तत्रछागस्येतिछाग्यामसंभावितमितिभव
तितत्पुंस्त्वनिर्णयइतिप्रपंचितंभूषणे चतुष्कं संख्यासहितंत्रिकमित्यर्थः एवकंकारकसहितंवचनषट्कमित्य
र्थः ॥

र्थाद्भवतीतिः पुंस्त्वविशिष्टपशुत्ववगतिरितिभावः प्रपंचितमिति लौकिकमेवलिंगंनामार्थः तच्चावयवविशेष
संस्थानरूपं दारानित्यादौ पुंस्त्वारोपेणैवतत्प्रयुक्तकार्यम् अत्रचरात्राह्नाहाः पुंसीत्यादेर्लिंगानुशासनस्यैव
मानत्वादतएवतत्पशुस्त्रियायागासिद्धिः अथवास्त्रीत्वादिजातिरेव तिस्रोजातयएवैताः केषांचित्समवस्थि
ताः अविरुद्धाविरुद्धाभिर्गोमहिष्यादिजातिभिरित्यादितत्रोक्तमिति परेगुणावस्थाविशेषएवपारिभाषिकं

लिंगं अनयवैतदवस्थात्रयस्य पदार्थमात्रे सत्वात्सर्वोऽप्ययं पदार्थः इत्थं व्यक्तिरिदं वस्त्विति व्यवह्रियते न तस्तनकेश
वती नारी लोमशः पुरुषः स्मृतः एतयोरन्तरे यत्तु तदभावे नपुंसकमिति स्मृत्युक्तलक्षणलक्षितेनत् तस्मात्सावेत्रि
कत्वात् दारानित्यादौ तदर्थस्य नाटशोपुंस्त्वाभावेन नत्वानापत्तेः तथा च भाष्ये एकार्थे शब्दान्यत्वाद्दृष्टं लिंगान्य
त्वमवयवान्यत्वाच्चेति केऽपटोऽपि तत्र पुष्यस्तारका नक्षत्रमिति शब्दनानात्वदर्शनात्स्तनकेशाद्यतिरिक्तमेव लि
गमर्थे निष्टं कुटी कुटीर इत्यादौ रेफस्यावयवस्योपजने लिंगभेददर्शनाच्चेति विहृतवान् पुंलिंगः शब्द इत्यादौ तु पुलि
गादिशब्दाग्रशः प्रयुज्यते ताः आत्मेति सर्वस्याध्यस्तत्वेन परंपरया तत्रापि स्त्रीत्वादिसत्वादात्मा ब्रह्मेति व्यवहारोपपत्तिः
स्यान्नेति रोभावो पचय इति यावत् उपचयादीनां विवक्षया पव्यवहारनियामकत्वात्तेषामेकत्र विरोधेऽपि तत्स्वभा
भावात् तत्र कश्चिद्दृष्टव्यक लिंगविशिष्टे कश्चिल्लिंगद्वयविशिष्ट इत्यादि लिंगानुशासनाल्लोकतश्चावगन्त
व्यम् भावतत्त्वविदः शिष्टाः शास्त्रार्थेषु व्यवस्थिताः यच्छब्दमीङ्गतामेतिन तत्र लिंगप्रचत्तन इति हर्युक्तेः अव
श्यं कश्चित्स्वहृतेनान्त आस्थेय इति स्त्रियामिति सूत्रे भाष्यात्तु मादिशब्दानां हस्त्यादिपदवच्छास्त्रीयः संकेतः न
त्रटिपुमादिवल्लव्धीसंज्ञा युक्तेनि गरुहसंख्यानानात्वादिशास्त्रप्रसक्तौ लौकिकस्यापि लिंग ॥ ॥

सति भिन्नत्वेनान्वयेण पुमादिसंकेतानां संख्यासंज्ञाया इवार्थान्तरपरिग्रहार्थं प्रवृत्तत्वे पर्यार्थान्तरनिरा
सार्थमप्रवृत्तत्वेऽस्य स्वतएवाविर्भावतिरोभावस्य निष्प्रेत्यपपाद्यितनः पमोमूर्तिपुंस्त्वामलिंगत्वे
नत्ववास्तिता इत्यपि नाम मर्थमूहीचकार हरिः तत्र सति संभवे सामानाधिकरण्ये संबंधेन शास्त्रीय
विशिष्टे लिंगे पुमादिशब्दानां शक्तिर्न केवलशास्त्रीयेनापि लौकिके असंभवे तु शास्त्रीय एव अ
न एव व्यपस्थनायते तेन तत्र व्युत्पत्तियाहतेयोगो वैगुण्यं न तत्र लौकिकपुंस्त्वविशिष्टशास्त्रीयपुंस्त्वस्यैव शा
ह्येन प्रतिपादनादित्याहुः ननु लिंगे शक्तिग्रहीयाविषयतायास्य भावेन प्रातिपदिकार्थताभावेन त्रिकं
प्रातिपदिकार्थ इति पतोनुपपन्न इति चेन्न स्वमोर्नपुंसकादिति प्राप्ते न पुंलिंगविशिष्टोर्थे चटोच्चटपदा
वाच्य इत्याकारकशक्तिग्रहाभ्युपगमेन शाब्दनिष्ठमेव लिंगन्त्वादि प्रवृत्तौ प्रयोजकमिति मते शब्दा
र्थयोरभेदमते लिंगस्य सात्त्वादितरथा स्ववाचकवाच्यत्व संबंधेनार्थांशे प्रकारतथा मतांतरे च सात्वा
देव प्रकारत्वसंभवेन धर्मितावच्छेदकत्वेन धर्मितावच्छेदकसमानाधिकरणविशेष्यत्वेन वा शक्तिग्र
हविषयतायाः शाब्दे भाननियामकत्वस्य फलबलेन कल्पनायामदोषादित्यासां विस्तरः लिंगा
दित्रयस्य नामार्थत्वनास्तीति शंकते ॥ ॥ ॥

भू॰
मा॰ द॰
१२३

नन्विति अन्वयव्यतिरेकाभ्यामिति अश्वादिपदाट्टाबादिप्रत्ययसत्त्वे लिंगबोधात्तदभावे तदबोधादेवं द्वितीयादिसत्त्वे
कर्मादिबोधादेकवचनादिसत्त्वे एकत्वादिसंख्यादिबोधात्तदभावसत्त्वे तत्तदबोधादित्यर्थः प्रत्ययस्यैवेति टाबादि
प्रत्ययस्येत्यर्थः एवकारेण प्रातिपदिकव्यवच्छेदः तदिति लिंगादित्रिकमित्यर्थः तत एवेति प्रत्ययादेवेत्यर्थः
प्रत्ययवर्जिते इति तथा च व्यतिरेकव्यभिचारान्न प्रत्ययवाच्यता लिंगादीनामिति भावः दधियपश्येत्यादावित्यादिप

नन्वन्वयव्यतिरेकाभ्यां प्रत्ययस्यैव तद्वाच्ये तत एव लिंगादीनामुपस्थितौ प्रकृतिवाच्यत्वे मानाभावाच्चेति चे
न्नत्यम् प्रत्ययवर्जिते दधिपश्येत्यादौ प्रत्ययमज्ञात्वतोऽपि बोधात्प्रकृतेरेव वाच्यत्वं कल्प्यते लिंगानुशासन
स्य प्रकृतेरेव दर्शनाच्च ॥

दादिपरिग्रहः तत्र स्त्रीत्वबोधकटाबादिकं विनापि तद्बोधात् ननु तत्र लिंगबोधानभ्युपगमेत्ताति वि
रहो दधिपश्येत्यादौ कर्मत्वबोधस्तत्र सविभक्तिस्मरणेनाप्युपपन्न इत्यत आह लिंगानुशासनस्या
पीति तथा च वागादिशब्दानां लिंगार्थकत्वाभावे वाचावाणादिशब्दैः सह तेषां पर्यायतानापत्तेः लि
गानुशासनस्यापि प्रकृतेरेव द

१२३

र्थेनाच्चनलिंगस्य प्रत्ययवाच्यत्वं लभवि
भक्तिस्मरणकल्पनयावो पइत्यर्थस्य प्रत्ययलक्षण
स्सलोयफल्लत्वंवदताभाष्यकृतातिरस्कारा उहपादतान्स
त्यय लोयमजानतेपितनोवोयाच्चनकर्मत्वादीनां प्रत्ययवाच्यत्वे
किंतुनन्नत्वदाहिंगादेवोपस्यस्सावंजनीनानुभवसिद्धतयातदुपपन्नये
लिंगादावपिशक्तिकल्पनावश्यकीतस्माद्बसोनः पुंसीत्यस्यतत्तलिंगस्यप्रकृ
तित्वेइत्यर्थः प्रातिपदिकार्थेतिसूत्रेपिलिंगइत्यस्यतत्रवर्त्त
मानादित्येवार्थः प्रथमायालिंगार्थकत्वाभ्युपगमे
चटेनेत्यादौनस्यतीत्यनापत्तेरितिपंच
कमित्यस्योपपत्तिरितिभा
वः ॥ ७ ॥
॥

भू॰
सा॰ द॰
१२४

आनन्त्यवेति प्रकृतिप्रत्यययोरन्यतरस्य वाचकत्वे युक्तिसद्भावे तौल्यादित्यर्थः न निर्भर इति नेदमेव समीचीनमित्याग्र
हइत्यर्थः तदेवाह युक्तत्वादिति अनन्तानां प्रकृतीनां शक्तत्वकल्पनापेक्षया कतिपयस्वादीनामेव तत्कल्पने ला
घवादिति भावः वस्तुतस्तु टावादिकं विनापि हलन्तेभ्यः स्त्रीत्वबोधात् ग्रामसत्तानादिशब्देभ्योऽनुत्पत्तिपत्ते पुंस्त्वाघवग
तेश्च लिंगस्य प्रातिपदिकार्थत्वमेव युक्तं अन्यथा शब्दे भानानापत्तेः संख्याकारकयोस्तु प्रत्ययार्थत्वमेव आनन्त्यव
स्वार्थो द्रव्यं च लिंगं च संख्याकर्मादिरेव च अमी पंचैव नामार्थास्त्रयः केषांचिदग्रिमाइत्यत्र त्रयाणां जातिव्यक्ति

आनन्त्यवैषुपत्तेश्च न निर्वेधः प्रत्ययस्यैव वाचकतायायुक्तत्वात् ॥

लिंगानामेव प्रातिपदिकार्थत्वमग्रिमाइत्यनेनोक्तं नन्वेकवचनत्वादेरनुगतस्य उ[illegible]वचनत्वे वक्तव्ये तेन रूपेण स्वादी
नामेकत्वादिवाचकत्वं तत्र वाचकतायाः शक्ततारूपत्वे आत्माश्रयात् बोधकतारूपत्वे द्विवचनादीनामपि श
क्तिभ्रमेणैकत्वबोधकतया तिप्रसंगाद्बोधकत्वं शक्तिरिति मते आत्माश्रयतादवस्थ्याच्च नाप्येकवचनत्वा
दिकं जातिः स्वप्यादिना सांकर्यात् पाणिनिसंकेतसंबंधेनैकवचनादिपदवत्त्वं तदित्यपि न तादृशसं
केतस्य संकेतत्वेन संबंधत्वे कस्यचिदे ॥

१२४

124

कवचनादिपदादौ जसादिवौं द्वयत्वाकारकसंकेतस्यापि संभवेनातिप्रसंगत्वादवस्थान् पाणिनिसंकेतत्वेन तत्त्वे वचा
करणेन तत्प्रणीतपुरुषान्तरस्यापि पाणिनिसंकेतस्य संभवान्नदीयसंकेतसंबंधेनैकवचनादिपदवत्त्वस्य डित्थादिप
दात्तौ जसादिवौं द्वयत्वाकारकपुरुषविशेषीयसंकेतसंबंधेन डित्थादिपदवत्त्वस्य वा विनिगमनाविरहेण शक्ति
तावच्छेदकत्वायत्तेरिति चेन्न सत्वात्वादिनैवैकवचनस्य शक्तिर्न त्वेकवचनत्वादिना कार्यतावच्छेदककोटावप्य
वच्छितोऽन्तरत्वनिवेशात्परस्परजन्यबोधे व्यभिचारः दधिमधित्यादौ विभक्तिस्मरणं विनाबोधानुभवान्नदनुस्था
पनस्यावश्यकत्वं अन्यथा द्योतकत्वादिनोपि द्योतकाभावेन प्रातिपदिकादपि न बोधानुपपत्तेः ननु प्रकृतीनां
वाचकत्वेप्यनुगतस्य प्रातिपदिकत्वस्य शक्ततावच्छेदकत्वसंभवान्न प्रकृत्यानन्त्यप्रयुक्तगौरवमिति चेन्न प्रादि
पदिकत्वस्याप्युक्तरीत्या ऽवचत्वान्नदज्ञानेप्येकत्वादिबोधस्यानुभवसिद्धत्वाच्च पदत्वेन व[illegible]त्वेन शक्ततेन विभक्तेरर
पि वाचकतासिद्धेः एकत्वाद्युपस्थितेः स्वर्वैर्वणत्वाद्युपस्थितेरप्यनावश्यकत्वान्नदनुरोधेन तत्कल्पने गौरवाच्च पदा
र्थयोर्विशेष्यणभावेनान्वये विभक्तिपदजन्योपस्थितेस्तवताया अपेक्षणादेकप्रकृत्युपस्थाप्यघटैकत्वयोस्तद्भा
वेन परस्परमनन्वयापत्तेश्चेति वाचकत्वपक्षपरिष्कारः द्योतकतावादिनां पुनरयमाशयः न प्रकृतीनां घटत्वा
द्येकत्वयोर्विशकलितयोः शक्तिः किं त्वेकत्वादिविशिष्टघटादौ तथा चनोक्तानुपपत्तिरन्वयसेवाभावात्स्थकश

भू०
सा० द०
१२५

नत्वनभ्युपगमाच्च नानेन प्रकृतीनां शक्तत्वकल्पनागौरवमपि घटपदस्यैकत्वे शक्तिभ्रमदशायां घटः प्रमेय इति वा
क्यादेकत्वे प्रमेयमित्यादिप्रत्ययस्य सर्वसिद्धतया तदनुरोधेनैकत्वादिविषयकशाब्दबोधे घटादिपदजन्यैकत्वाद्यु
पस्थितित्वेन हेतुताया आवश्यकत्वाच्च किंच विभक्तेः संख्यावाचकमते समानविषयकत्वान्निमित्तं प्रतिशाब्दसामग्री
प्रतिबंधकतायां प्रातिपदिकजन्यघटाद्युपस्थितिर्विभक्तिजन्यैकत्वाद्युपस्थितिश्च निवेश्या तथा च तयोर्विशेष्य
विशेषणभावे विनिगमनाविरहेण प्रतिबध्यप्रतिबंधकभावद्वयकल्पनप्रयुक्तगौरवं प्रकृतेर्विशिष्टशक्तत्वे तु तत
दुभयसंख्यीयाविशिष्टविषयकोपस्थितेरेकैव सामग्री वा प्रतिबंधकतायां निवेश्येति लाघवं विशिष्टविषय
कोपस्थितेरप्येकत्वादिप्रकारतानिरूपितघटादिविशेष्यताशालित्वेन घटादिविशेष्यतानिरूपितैकत्वादिप्र
कारताशालित्वेन वा प्रवेश इति विनिगमनाविरहात्साम्यमिति तन्न भवन्मते योग्यताज्ञानघटोपस्थित्यैकत्वो
पस्थितीनां तिसृणां विशेष्यविशेषणभावे विनिगमनाविरहेण यत्र प्रतिबध्यप्रतिबंधकभावषट्कं तत्र प्र
कृतेरेकत्वादिवाचकतामते योग्यताज्ञाने विशिष्टविषयकोपस्थितेः प्रत्येकं दर्शितोभयरूपेण वैशिष्ट्यं नि
वेश्यत इति द्वयं प्रत्येकं तादृशरूपाद्वित्राणामुपस्थितौ योग्यताज्ञानस्य वैशिष्ट्यं निवेश्य वद्धमिति चतुष्टयमि
तिरीत्यास्मन्मते तु लाघवात् अतिप्रसंगपरिहारस्तत्तत्संख्याबोधे तत्तद्विभक्तिवचनसमभिव्याहारस्य कारणत्वकल्पनात्

पक्षद्वयेपिहरिसंमतिमाह द्योतिकावाचिकावेति यद्वा संख्यावतोर्थस्य समुदायोभिधायक इत्येतत्सर्वं नराद्वैं यदुक्त्वा
द्याकारकान्वितस्यैवाभिन्नसमुदायो वैकत्वादिविशिष्टघटादिवाचक इति तदर्थः पदस्फोटमवलंब्य चेदं नामार्थधात्वर्थयोः
साक्षादभेदातिरिक्तसंबंधेनान्वयस्याव्युत्पन्नत्वात्समस्ततोभिधानानभिधानव्यवस्थानुपपत्तेश्च कारकं विभक्त्यर्थः यदि च सं
ख्याविभक्त्यर्थ इति पक्षस्तदा नाभिहितादिकारोपयोगः उक्तार्थानामप्रयोग इति न्यायाच्च नचैत्रः पचतीत्यादौ तृतीयाप
त्तिः भीष्मः कटं करोतीत्यादौ कटोपि कर्मेत्यादिभाष्योक्तरीत्या सामंजस्यं तेडलः पचतीत्यादौ नामार्थयोः परस्परान्वया

द्योतिका वाचिका वा स्युर्द्वित्वादीनां विभक्तयः इति वाक्यपदीये पक्षद्वयस्यापि व्युत्पादनात् शास्त्र इति बहुस्थलेषु
व्युत्पादने व्यंजापितेः प्राधान्येन सरूपसूत्रादौ व्यक्ते ॥ १ ॥ पादनस्य तंडुलकर्मकपाकादिविशेष्यकत्वेनेत्याकारका
न्वयबोधस्य नियामकतया तदभावासंभवात् तादृशव्युत्पत्त्यनंगीकारादिति विभाव्यते तदा कारकमपि प्रातिपदिका
र्थः अस्मिन्पक्षे संख्याया इव कारकस्यापि विशेषणतयैव भानं विभक्तिद्योत्यत्वात्तस्य नचैवं प्रातिपदिकार्थप्रकारकबो
धे स्वज्ञत्वोपस्थितेर्हेतुत्वं विलीयेतेति वाच्यं इष्टापत्तेः जातिलिंगसंख्याकारकविशिष्टद्रव्यस्यैव प्रातिपदिकार्थत्वाद्बोधे
न सर्वथा विशेषकोपस्थितेर्हेतुत्वस्यात्र पक्षे गगनकुसुमायमानत्वादिति पंचकमिति परिष्कारः सरूपसूत्रादावि
ति तत्सूत्रादिभाष्य इत्यर्थः आदिना नभिहितसूत्रपरिग्रहः प्रसंगाज्जात्यादिवद्बहुत्वस्यापि वाच्यत्वं व्यवस्थापयति ॥

भू. सा. द. १२९

126

शाब्दस्तावदिति अपदार्थस्य प्रकारत्वादिना शाब्दे भानासंभवात्तत्रापि शक्तियवच्छेदकीत्यभिप्रायेणाह भासत इति अयं भावः वैयाकरणमते शब्दार्थयोस्तादात्म्यात्तन्मूलाभेदाध्यवसायेन शब्दादर्थाकारवृत्तौ जायमानायां तस्याकारस्यापि समर्पणमिति शब्दस्यापि विषयता अत एव ग्राह्यत्वं ग्राहकत्वं चेत्यादिना वाक्यपदीयसंमतिं वक्ष्यति तत्र तात्पर्यवशा द्द्वयथा शब्दप्रकारको बोधो योऽर्थबाधे न शब्दविशेषको बोधः अतः स्वरूपमिति भाष्येनैवैतदुक्तम् किं कारणं शब्द पूर्वकोऽप्यर्थसंप्रत्ययः अन्तश्च शब्दपूर्वः योऽमित्यसौ नास्त्यात्रापते नामच पदातेन नोपलब्धं भवति तदाहुर्बति

शाब्दस्तावच्छाब्दबोधे भासते न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ॥

किं भवतीत्याहेति शब्दपूर्वकस्यार्थस्य प्रत्ययः इह शास्त्रे शब्देऽसंभवादर्थेऽसंभवादर्थस्यापि तद्विनिरित्युक्तं शब्दपूर्वका हीत्यस्य अन्तः शब्दज्ञानपूर्वकोऽर्थप्रत्यय इति लोके प्रसिद्धमित्यर्थः अन्वयमुक्त्वा व्यतिरेकमाहान्तश्चेति प्रका रान्तरमाह शब्दपूर्वकश्चेति शब्दविशेषणकइत्यर्थः तेनार्थेऽसंभवे कारणत्वेन विशेषणत्वेन चोपस्थिते शब्दे कार्यमित्यर्थः चकारेण युक्तेनरत्वमेवोचितयन्तज्ज्ञाप्यसिद्धार्थप्रतिपादकवाक्यपदीयसंमतित्वेन प्रदर्शिति नसोऽस्तीति ॥

अनुविद्धमिति यथार्थेनानुविद्धं ज्ञानमनुव्यवसायो विषयीकरोतीति तथा शाब्देनापीत्युक्तानुज्ञाने शाब्दभाने व्यवसायप्रमा-
णमिति दर्शितमत एवोदेति सविनानामन्वयवाक्यमेति चेत्यादौ पौनरुक्त्यमदोषतेन न कांश्चप्रकाशगदाद्युक्तं विभिन्नप-
दोपादाने शाब्दबोधे भीप्सितस्यैकरूपास्यात्लाभादिति ननु घटमानयेत्यादिशाब्दबोधे शाब्दभाने मानाभावः शा-
ब्दकमत्वस्यानयनेवाप्यात् नापि घटांशे विशेषणतया प्रयोजनाभावात् घटादिपदानामर्थेन्वये च शक्तिकल्पने
गौरवाच्च किंच पकसंबंधिज्ञानस्यापरसंबंधिविनाशाद्वा दर्थोपस्थितेरसंभवेन तदुपस्थितये शाब्दार्थयोः शक्त्याख्यसं-

अनुविद्धमिव ज्ञाने सर्वं शाब्देन भासत इत्यभियुक्तोक्तेः ॥

बंधकल्पना न च स्वप्रतियोगिकसंबंधवत्वं स्यादस्मिन् घटवद्भूतलमितिवत् घटो घटवानिति प्रतीत्यापत्तेः अतो
नतेनास्योपस्थितिः नापि प्रात्यक्षिकाद्युपस्थितिः शाब्दभाने नियामिका प्रत्यक्षाद्युपस्थितपदार्थान्तरस्यापि भानाप-
त्त्या हृत्तिज्ञानजन्योपस्थितेरेव नियामकत्वकल्पनात् घटमानयेत्यादिशाब्दबोधे नेतरघटकर्मकानयने शा-
ब्दयामीत्येवानुभवाच्च शब्दार्थयोरभेदस्तात्सिद्ध एव ॥

भू॰
सा॰ द॰
१२०

उक्तभाष्येणापिशाब्दस्यसाक्षादुपस्थितत्वेनतस्यानलक्षणयः सतिबाधकेक्वचिदर्थांशेतज्ज्ञानमित्येववोधनात्रस
र्वेत्रशाब्दभानेनतत्प्रमाणमतस्त्राह विलम्बच्चारयेत्यादाविति तथाचार्थापत्त्याख्यप्रमाणमेवशाब्दस्यपदवाच्यत्वसा
धकमितिभावः विनापिशक्तिमन्वयानुपपत्तिवशाच्छाब्देशाब्दभावनस्यलक्षणयाप्युपपत्तेर्नार्थापत्तिः शक्तिसा
ध्यिकेत्याशंकानिराचष्टे नचेति निरुढेति अनादितात्पर्यग्रहमूलिकेत्यर्थः शक्त्यनतिरेकादिति अस्य

विलम्बच्चारयेत्यादावर्थोच्चारणासंभवेनविनाशाब्दविषयतोशाब्दवोधासंगतिरेवेतिविभावनीयं सोपिर
प्रातिपदिकर्थः नचलक्षणयानिर्वाहः निरूढलक्षणायाः शक्त्यनतिरेकात् जवगडदशमच्चारये
त्यादौपक्षव्यग्रहैणाशकासंवंपरूपलक्षणयाप्यग्रहात्व अशक्तापाश्चहतेरनुपयोगात् ॥

त्यतेलक्षणायाहत्तित्वानुपगमादितिभावः पतन्नत्वेशक्तिवादेवस्तुते तत्स्वीकारेप्याह जवगडदशमिति श
क्यग्रहेतोति समुदायेशक्त्यभावेनतदग्रहात्तद्घटितलक्षणायाअसंभवेन लक्षणाग्रहासंभवादित्यर्थः
नन्वेकात्तरकोशादिवृज्जादिशब्दानां ॥

शक्तिप्रतिपादनात्तन्नदर्थवाच
कत्वरूपलक्षणयावर्णेषुसंभवात्तया
तत्तद्वर्णोपस्थितौतेषूच्चारणकर्मत्वान्वयोनान
पपन्नरत्यतआह प्रज्ञातयाश्वेति तथाचगंगापदस्यतीरा
दौवृत्तस्सनः स्वशक्यसामीप्यसंबंधस्यानुपस्थितिदशायांलक्ष्यार्थबोधा
नुदयेनज्ञाततयापवृत्तेःशाब्दबोधौपयिकत्वस्यावश्यकल्पनयाप्रकृतेतत्तद्व
र्णवाच्योपस्थितिंविनापिशाब्दबोधस्यानुभवसिद्धतयाशक्यसंबं
धरूपलक्षणग्रहस्यशाब्दोपस्थित्यधीनतयातदभा
वात्तद्ग्रहासंभवेनशाब्देभानोपपत्तये
शाब्देशक्तिस्वीकारआव
श्यकइतिभा
वः ॥

भू॰
सा॰ द॰
१२८
128

स्थलविशेषेलक्षणापिनसंभवतीत्यभिप्रायवानाह गामुच्चारयेतीति अनुकरणइति गामुच्चारयेत्याद्यनुकरण
इत्यर्थः साधुतेति तदंतर्गतत्वादिशब्दानांसाधुत्वंसर्वैरंगीकारादित्यर्थः भवन्मतेतेषांचापिशक्त्यभावेनश
क्यसंबंधरूपलक्षणायाअसंभवाद्वृत्तिमत्त्वाभावेनाप्रातिपदिकत्वान्नतः स्वाद्युत्पत्त्यसंभवेनासाधुत्वापत्तेरिः

गामुच्चारयेत्यादिशब्दानामनुकरणेसाधुतासंप्रतिपन्नेस्तेषांशक्त्यभावेपरनयेलक्षणाया असंभवाच्चे
त्यतः बोधकत्वापि क्वचित्प्रातिपदिकार्थइत्याह शब्दोपियदिभेदेनविवक्षःस्याद्यदातदानोचेच्छ्रोत्रादिभिः
सिद्धोप्यसावर्थेवभासते यथानुकार्यानुकरणयोर्भेदविवक्षातदाशब्दोपि ॥

तिभावः बोटापि पूर्वोक्तपंचकमोहतः शब्दोपीत्यर्थः क्वचिदिति अनुकरणशब्देइत्यर्थः अनुकरणेद्विविधंध
नेर्वर्णस्यच आद्यंपटदितिकरोतीत्यादि द्वितीयंभूकेवुगित्यादौभूशब्दादिभेदविवक्षेति पटदित्यादौध्वनिमयत्व
वर्णमयत्वाभ्यां भूवौवुगित्यादौचार्थपदार्थकत्वशब्दपदार्थकत्वाभ्यांभेदात्तद्विवक्षेत्यर्थः ॥ ॥

प्रातिपदिकार्थ इति तथा च लक्ष्यार्थबोधकत्वेन प्रातिपदिकत्वात्तेभ्यः स्वाद्युत्पत्तिरित्यर्थः यत्तच्च मनो बुद्धिरिति सूत्रे यो सा
वान्याये ऽस्य वाम शब्दः प्रवृत्ते सत्व प्रत्यय प्रकृतेरस्य वामीयमित्यादौ पदार्थान्तर वप्रातिपदिकत्वाच्च सिद्धिरिति भाष्ये
स्पष्टम् अर्थेऽवभासत इति यत्तच्चार्थेऽवभासत इति पाठमभिप्रेत्य वस्तुवस्त्वर्थो ऽवभासत इत्येव पाठः वशाद्वन्ने
वार्थः तथा चार्थवद्भासत इत्यर्थः अत एवमुख्येणोपस्थितेष्ववविहतं तन्नूपस्थितत्वात्पदमिव पदार्थान्तरमपि तत्र भास

प्रातिपदिकार्थः पदितभेदविवक्षातदाश्रोत्रादिभिरुपस्थितोऽर्थेऽवभासते इत्यर्थः अपि हेतोऽरुपस्थितत्वा
द्भासत इत्यर्थः अयंभावः अन्तकार्यानुकरणयोर्भेदेन कार्यस्य पदानुपस्थितत्वात्तन्सिद्धये शक्तिरुपेया
अभेदे प्रत्यक्ते विषयस्य हेतुत्वात्स्व प्रत्यक्ष रूपोपपदजन्योपस्थितिमादाय शाब्दविषयतोपपत्तिरिति यद्यप्य
ति ॥

ता मतस्त्राहार्यभाव इति तथा च पदजन्यपदार्थोपस्थितेः शाब्दबोधहेतुतया प्रात्यक्तिकपदोपस्थितेर्विषयतया स्व
जन्यत्वेन तद्विषयस्य पदस्य शाब्दबोधे भानेन पदार्थान्तरस्येति नोक्तदोष इति भावः पदानुपस्थितत्वादित्यस्य शाब्दे
भानानापद्येतिशेषः तन्सिद्धय इति शाब्दविषयतोपपत्तय इत्यर्थः शंकते यद्यपीति ॥

अतिप्रसंगोति येनकेनचित्संबंधेनपदजन्योपस्थितेः शाब्दबोधहेतुताभ्युपगमेघटादिपदात्समवायेनोपस्थिता
काशस्यशाब्दबोधेभानातिप्रसंगवारणायेत्यर्थः आश्रयतयेति बोधकत्वरूपशक्तेराश्रयत्वस्यपदेसत्वान्नतस्यवृ
त्तिमत्वानुपपत्तिरित्यर्थः तथाचतद्विषयकशाब्दबुद्धिंप्रतिपदजन्यनिरूपकताश्रयतान्यतरसंबंधेनवृत्तिविशि
ष्टविषयकोपस्थितहेतुत्वकल्पनान्नपदस्यशाब्देभानानुपपत्तिरितिभावः अपरेतु उक्तरूपेणपदार्थोपस्थितेः का
रणत्वेपदजन्येतस्यपदनिष्ठजनकतानिरूपितजन्यतावदित्यर्थोवाच्यस्तच्चजनकतायास्तादात्म्यसंबंधावच्छिन्ना

प्रसंगवारणायवृत्तिजन्यपदार्थोपस्थितिरेवशाब्दहेतुस्तथाप्याश्रयतयावृत्तिमत्वसत्वात्रानुपपत्तिः
निरूपकत्वाश्रयतान्यतरसंबंधेनवृत्तितमपदशाब्दविषयत्वेकल्पतइत्यनवद्यं संबंधस्योभयत्रनिरू
प्यतान्यदार्थस्यैवतद्बोधकत्वेनबोधकत्वेनस्वस्यापिज्ञानसंभवाच्चेति उक्तंचवाक्यपदीये ॥

पाभिवेशेऽर्थोपस्थितेरसंग्रहः वृत्तिसंबंधावच्छिन्नत्वनिवेशेचपदोपस्थितेरसंग्रह इत्यन्यतरसंबंधावच्छिन्नत्वंजनक
तायांनिवेश्योक्तरूपेणविशिष्टविषयकोपस्थितिशाब्दबोधयोः कार्यकारणभावोवाच्यस्तथाचवृत्तेर्द्वैधाप्रवेशः
कारणतावच्छेदकगौरवंच तदपेक्षयाभेदपदेसादृश्यसंबंधेनानुकरणादनुकरणादनुकार्योपस्थितिस्तथोपस्थि
तस्यापितान्यर्थ्येवणव्याख्याबेभाने वृत्तिज्ञानस्यचसादृश्यज्ञानज ॥

न्यथाशब्दमेवकार्यतावच्छेदकमित्येवकल्प्यमियमेवाभेदज्ञानामस्मात्सादृश्यमूलकाभेदाध्यवसायात् अतएवगवित्यप्रमाहे
त्वादेरविभक्त्यन्तस्यनिर्देशार्थबोधकत्वरूपार्थवत्त्वाभावेनाप्रातिपदिकत्वात् अतएवमतोर्ह्रस्वनिरूढत्वेभाष्येवेदस्यात्र
करणस्यपदार्थद्वयमुक्तं किमनयोरन्यत्वमितिप्रश्नेडोमित्याह आम्नायशब्दानांस्वरवर्णानुपूर्वीदेशकालनियतत्वा
दित्येवोक्तं नत्वर्थभेदादिति तस्मात्सार्वत्रिकत्वात्त्रसतत्रभेदहेतौरितितदाशयः कैयटेनापितत्राकरणोक्तमेण
पुच्चार्यमाणेसादृश्यादर्थप्रत्यायकंभवतीतिदृष्टस्यदृष्टमेवोक्तमित्याहुः ननुपदज्ञानेपदार्थोपस्थितौसंबंधिज्ञानविध
योपयुज्यते संबंधिज्ञानजन्योपस्थितौचसंबंधिव्यतिरिक्तस्यैवभाने हस्तिपकादिदर्शनाद्धस्त्याद्युपस्थितौहस्तिप
कादेर्भानानुभवात् तथाचपदप्रत्यक्षजन्यपदार्थोपस्थितौपदभानासंभवात्कथंतस्यशाब्दविषयतेत्यतआह सं
बंधस्येति उभयनिरूप्यत्वादितिविशेष्यविशेषणोभयनिरूप्यत्वादित्यर्थः तथाचपदज्ञानादर्थोपस्थितौतयाच
संबंधिज्ञानविषयापदोपस्थितौस्वप्रयोज्यत्वरूपपदजन्यत्वस्यामपिसत्त्वेनशाब्दबोधेभानोपपत्तिः तथाचोक्तं
यत्संज्ञास्मरणेतत्रनतदप्यत्रहेतुकेऽपिउपवर्हिरूढः सत्संज्ञोस्यारोपितेत्तमहति दृष्टउपस्थितः नत्वदुपिय
हिरादिशब्देभ्योविशिष्यगृहीतशक्तिकेभ्यस्तु इदंपदंशक्तिमदितिसाधुपदत्वादिनाघनानुमानगृहीतसामान्यशा
तैवनलपदवाच्यतेनैवबोधविषयता तत्रविशेषरूपेणबोधस्याहेतुपयादत्वादितिभावः ॥

भू०
सा० द०
१२०
130

उक्तार्थे हरिसंमतिमाह ग्राह्यत्वमिति विषयत्वमिति स्वस्वविषयत्वाम संपाद्यार्थानवोध्यत इत्यर्थः नैवापिकार
व्युत्पत्तिरेवेत्येवकारेण प्रकृतित्वेन प्रकृत्यर्थघटितव्युत्पत्तिव्यवच्छेदः उपकुंभादौ व्यभिचारेऽह्नावनं तु उपादिपदानां कुंभस
मीपादौ लक्षणेति तन्मतमित्यभिमानेन नैरुक्तानां शास्त्रस्थलेषूत्तरपदप्रवलक्षणायगमादिति वा ध्यं सन्निहितत्वे
चनवास्तवास्तवाव्यवहितपूर्वत्वं किंत्वव्यवहितपूर्वत्वेन तयानुशासनेन बोधितत्वं तच्च उपचरखदिरादित्यादौ यवा
दीनामिवात्राप्युपादिपदानामक्षतमित्यभिप्रेत्याशंकते नचतत्रापीति तत्र अर्द्धपिप्पलीत्यादौ अर्थवत्सूत्रे
णेति समासग्रहणं नियमार्थमिति मतेनेदं तथाचानुशासनबोधिताव्यवहितपूर्वत्वमपि विशिष्टस्यैव न के
वलपूर्वपदस्येति भावः प्रकृतित्ववत्त्वस्य पर्याप्त्याख्यविलक्षणसंबंधेन समुदायमात्रविश्रांततेपि केवला
श्रयतया तद्वत्त्वस्य प्रकृत्यैकदेशेपि सत्त्वात्पूर्वोक्तव्युत्पत्तिशरीरे आश्रयतयैव निवेशनीया न पर्याप्तिरित्या
शयेनाशंकते अथेति प्रकृतित्वाश्रये प्रकृतित्वाश्रयार्थे पूजनादेरिति पूजनादिकर्मत्वस्येत्यर्थः ॥

घटेपीति घटपदस्यास्याश्रयतया प्रकृतित्वात्तन्निरूढत्वात्पेटः विशेषणतयेति एकत्र विशेषणतयान्वित
स्यापरत्रानन्वयइत्यनिव्युत्पत्तेरित्यर्थः पाकान्नील इति नीलरूपवत्त्वयोर्धर्मिंशेऽन्वयस्य वैधत्वादिति विशेषणे तया
न्वितयोः पंचम्यर्थजन्यत्वेनान्वयापत्तिरित्यर्थः एकत्र विशेषणतयान्वितस्यापरत्र विशेषणतयानन्वयो॰
निराकांक्षत्वादिति द्विव्युत्पत्तिस्तदनालोचनविजृंभितमेतद् दूषणदानमिति विभावनीयं तज्जन्यज्ञानविष॰

घटेप्यानयनान्वयापत्तेश्च नचदंडादेर्विशेषणतयानयनाद्यन्वयः पाकान्नीलो धर्मान्सुखीत्या
दौ पाकधर्मादिजन्यतायारूपसुखादावनन्वयप्रसंगात् पंचम्यर्थत्वं तज्जन्यज्ञानविषयत्व
मात्रे तच्चात्राविरुद्धमिति तत्र घटपदोपस्थितत्वे घटपदात् समवायेनोपस्थिताकाशावारणाय
कृत्याप्रकृत्यर्थत्वस्यावश्यकत्वात् ॥

यत्वमात्रमिति अत्र तदोर्थः प्रकृ तिः मात्रपदेन कृत्याप्रकृतिया॰
घत्वस्य व्यवच्छेदः अत्र वित्रग्रमानयोम्यादौ उपस्थिताकाशावारणायेति समवायसंबंधेनोपस्थिताकां
शोद्देशेन कर्मत्वादीनामन्वयवारणायेत्यर्थः हस्तिवत्रत्तानसामान्यार्थकः आलोचनपरत्वेऽयोग्यत्वा
देवान्वयापत्तिविरहात् इति कृत्याप्रकृत्यर्थत्वस्येति प्रकृतित्वरूपितहानिमत्त्वरूपप्रकृत्यर्थत्वस्य कृत्यता

वक्तृणिष्ठितवाचीनपदार्थः ॥

मूं॰
सा॰ द॰
१५२
152

दिवादिनाकेयावेतोर्थाः संभवंतिनावतां दुःखणस्य संप्रदायिकत्वमित्याशयेन दुःखयिष्वं पूर्वोक्तव्युत्पत्तिवाक्यतात्पर्यं
कल्पयति अथेत्यादिना दुःखयति गामानयेत्यादिना कृष्णपदस्थापितनीयाप्राग्वर्त्तित्वसत्वादिति भावः अलुक्समक
लनामिति अलुक्मायाः समासोत्तरप्रत्ययस्य समस्यमानपदार्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः लुक्मेति लुक्मायासर्व
मायारणप्रत्ययाणामिति व्युत्पत्तिस्तत्यागमित्यर्थः ननु प्रत्ययानां सन्निहितपदार्थान्वितस्वार्थबोधकत्वमित्येव व्युत्प
त्तिः तत्र सन्निहितत्वं प्रत्ययाव्यवहितप्राग्वर्त्तित्वं पदार्थत्वं च तद्व्याप्यपदजन्योपस्थितिविशेष्यत्वमेव तच्चालुक्समेवेतिनसमा

अथ प्रत्ययप्राग्वर्त्तिपदजन्योपदार्थत्वं च तद्व्यापदजन्योपस्थितिविशेष्यत्वं प्रकृत्यर्थत्वमितिचेन्न गामानयति
कृष्णोदंडेनेत्यत्र कृष्णेन तृतीयार्थकरणत्वान्वयप्रसंगात् अथ समस्यमानपदार्थगतस्वार्थगतस्वार्थबोधकत्वं स
समासोत्तरविभक्तेः कल्प्यत इति चेन्न अलुक्समकल्पनेऽलुक्समव्युत्पत्तित्यागं चापेक्ष्य समुदायशक्तिकल्पनसे.
वयुक्तत्वादिति दिक् अपि च समासे शक्त्यस्वीकारे राजपुरुषश्चित्रगुनीलोत्पलमित्यादौ सर्वत्रानन्वयप्रस

सक्तेऽलुक्समकल्पनेऽपि नतस्याहृदिगृति पदे सन्निहितत्वविशेषणे गौरवं पवरवदिरावित्यादौ पूर्वपदार्थैकर्मत्वा
नन्वयप्रसंगश्च शक्त्यनंगीकर्त्तृमते दोषः अस्मन्मते क्वाप्यनुपपत्त्यभावेन न प्रत्ययानामिति व्युत्पत्तिभंग इत्यादिदि
गर्थः ननु प्रत्ययानामिति व्युत्पत्तेः प्रकृत्यर्थः प्रकारकबोधे प्रत्ययजन्योपस्थितिविशेष्यतयाहेतुः प्रत्ययार्थसंख्या
प्रकारकबोधे प्रकृतिजन्योपस्थितिविशेष्यतासंबंधेन कारणमिति वार्थः तत्र प्रत्ययत्व प्रकृतित्वयोरनुगतयो
र्दुर्वचतया तत्पदार्थभेदेन कार्यकारणभावो वाच्यस्तथा च समासे प्रकृत्येकदेशार्थप्रकारकबोधेऽपि न तत्तिरनस्याह अ

सि चेति तत्वयप्रसंगादिति नामार्थयोरिति व्युत्पत्तेरिति भावः ॥

तदेवाह राजपदादेरिति लक्षणायामपीत्यत्रापि स्तदत्वभुपममेतिनिरामनन्वयंस्तूचयति तत्तुनामार्थप्रकार
कावाधे विभक्त्याजन्योपस्थितेर्हि न तायास्तंडुलः शुभ्र इत्यादौ व्यभिचारोऽनआह तंडुलः शुभ्र इति तथा च प्रातिपदिके
र्थे विशेषणतया विभक्तिजन्योपस्थितेः सत्वान्न व्यभिचारः इति भावः शुभ्रेण तंडुलेनेत्यादौ प्रातिपदिकार्थे विभक्त्यर्थे
धायकाभावाद्यभिचारमाशंक्य तत्राप्यभेदार्थकविभक्तेः सत्वेन नातिप्रसंग इत्याह शुभ्रेण तंडुलेनेत्यादौ चेति अभेदा
र्थिकेति अथवा कटवृत्तन्त्या मानाधिकरण्यादौ कादिभ्यो दिती याभ विष्यतीति भावो णसामानाधिकरण्यस्य विशे

राजपदादेराजसंबंधिनि लक्षणायामपि तंडुलः पचतीत्यादौ कर्मत्वादिसंसर्गेण तंडुलादेः पाकादावन्वय
वारणाय प्रातिपदिकार्थप्रकारकबोधं प्रति विभक्तिजन्योपस्थितेरावश्यकत्वात्पुरुषादेस्तथात्वाभावात् तं
डुलः शुभ्र इत्यादौ प्रातिपदिकार्थप्रथमादेस्तस्य च शुभ्रेऽभेदेनैवान्वयः शुभ्रेण तंडुलेनेत्यादौ च विशेषणवि
भक्तिरभेदार्थिका ॥

षणवाचकपदोत्तरविभक्तिरेतत्तं वदतां समानाधिकरणयोर्भावस्याभेदरूपैकार्थसेवनतदर्थत्वस्य च नादिति भावः नन्
विशेषणविभक्तेरभेदार्थकत्वेऽभेदो दण्डावच्छिन्नाभावस्तदा प्रसिद्धिर्भेदस्य केवलान्वयित्वात् यदि भेदप्रतियोगिका
भावस्तीहं वह्न्यादौ द्वित्वादिना नीलप्रतियोगिकाभावसत्त्वान्नीलो वह्निरित्यादिवाक्यस्यापि प्रमाणापत्तिरिति चेन्न अ
भेदस्तादात्म्यं तच्च स्वस्वासाधारणो धर्मः असाधारणं च स्वप्रतियोगिवृत्तित्वस्य समानाधिकरणोभयसंबंधेन

भेदविशिष्टं पदार्थं तस्य च विभक्त्यर्थे तत्र कात्यायनप पठितं तं विस्तरः॥

भू॰
सा॰ द॰
१५२

153

अथ वा कटोपि कर्म भीष्मादयोपि कर्म तत्र कर्मणीत्येव सिद्धमिति भाष्यस्य द्वितीयपक्षाभिप्रायेणाह याष्टिक इति अत्र
तु कालिकमानसोबोध इत्यर्थः अग्रहणाधिकरणोक्तरीत्येति भावः ननु नामार्थयोर्नामार्थधात्वर्थयोरभेदातिरिक्तमात्रा
त्संबंधेनान्वयो नास्तीति व्युत्पत्तौ राजपुरुषस्तंडुलः पचतीत्यादौ स्वस्वामिभावादिसंबंधेन राज्ञः पुरुषादौ कर्मत्वसंबं
धेन तंडुलस्य पाकादावन्वयवारणाय कृत्स्नमिते तदर्थश्च नामार्थनिष्ठाभेदातिरिक्तसंबंधावच्छिन्नप्रकारतानिरू
पितविशेष्यतासंबंधेन शाब्दबुद्धिं प्रति विशेष्यतासंबंधेन विभक्तिजन्योपस्थितेर्हेतुतेति प्रकारतायामभेदातिरिक्त
संबंधावच्छिन्नत्वनिवेशाच्च न राजपुरुषलोकं पचतीत्यादौ व्यभिचारः विशेषणविभक्तेः साधुत्वमात्रार्थकतया

याष्टिको वान्वय इति नातिप्रसंगः तथा च समासे परस्परान्वयादावपि कोवसमुदायस्य तादृशविशिष्टा
र्थे शक्तिः किंच राजपुरुष इत्यादौ संबंधिनि संबंधे वा लक्षणा ॥

भेदस्य तदर्थकत्वाभावात् अत एव कटं पूर्वकर्मेति भाष्यव्याख्यावसरे भीष्मादीनां स्वरूपमकर्मत्वेपि विशेष्यसंबंधि
त्वैव विभक्त्याभाव्यं तदेकयोगक्षेमत्वात् केवलानां च प्रातिपदिकानां प्रत्ययः परश्चेति नियमादप्रयोगार्हत्वात्
यथेश्वरहरदः स्वयं निर्हुताः प्रापितदीयपते नैव तत्फलभाजः एवं गुणा अपीति तदुक्तं कैयटेनानभिहितसूत्रेत
दर्थे प्रातिपदिकार्थस्य तु त्वनशाहेभानानतु भवाश्च नीलो घट इत्यादावविशेषणविभक्तेः सार्थकत्वे विभक्त्यर्थस
संबंधेन नामार्थयोर्धात्वर्थयोरपि परस्परमन्वयस्य प्राचीनैरभ्युपगमात्सात्त्वादिति विभक्त्यर्थमद्वारीकृत्य ॰तिदर्थः
एवं च राजादिपदलक्षणिकार्थस्य पुरुषादिपदार्थेऽभेदेनान्वये न किंचिद्बाधकमत आह किंचेति ॥ ॥

विग्रहत्वादिति इदमत्र चिन्त्यम् विग्रहस्य विक्रियमाणसमानार्थकत्वं न विक्रियमाणजन्यबोधेयपदविशेष्यकत्वे सति यद्यत्र
कारकत्वं मन्त्र हि विशेष्यकत्वं तन्नु कारकबोधजनकत्वं ग्राममुदकं पयमित्यादेः ग्रामोदकादिसमासविग्रहत्वापत्तेः एवमिति व्याक
रणमधीत इत्यादि तिङन्तानां पाचको वैयाकरण इत्यादिकृदन्तानां च विग्रहत्वापत्तेश्च तत्र ग्रामसमासजन्यबोधविषया
णां तिङ्कृदन्तादिमात्र बोधजन्यबोधविषयाणां च विशेष्यविशेषणभाववैपरीत्येन भानात् नापि तज्जन्यबोधीययावद्वि
षयिकबोधजनकत्वं नैयायिकनये राज्ञः पुरुष इत्यादेरभेदानवगाहिबोधजनकस्य विग्रहत्वानापत्तेः पाकं करोतीत्य
स्य कर्मत्वाद्यविकावगाहिबोधस्य पचतीति विवरणत्वानापत्तेश्चेति किं तु विक्रियमाणजन्यबोधीयपरस्परसंबद्धतात्प
र्यविषययावदर्थप्रतिपादकत्वं तत् ग्राममुदकं यामित्यादिवाक्यानां समासजन्यबोधविषयतात्पर्यविषयसंबद्धार्थ

नाद्यः राज्ञः पुरुष इत्यादिविवरणविरोधात् समाससमानार्थकवाक्यस्यैव विग्रहत्वात् ॥

प्रतिपादकत्वाल्लक्षणसमन्वयः चटीपाककर्मतेत्येतावन्मात्रस्य घटमानयेत्येतद्विवरणत्ववारणाय यावदुपादानं घ
टः कर्मत्वमानयनं कृतिरित्यस्य परतात्पर्यविषययावदर्थप्रतिपादकस्य घटमानयेतीतित्ववारणाय संबद्धेति परस्प
रसंबद्धेति तदर्थः राजपुरुष इत्यादिसमासजबोधे ऽभेदस्य तात्पर्याविषयस्याधिकस्य भानेपि तात्पर्यविषयपरस्परसं
सृष्टयावदर्थप्रतिपादकत्वस्य राज्ञः पुरुष इत्यादौ सत्त्वान्नाप्रसंगः एवं पाकं करोतीत्यादावनात्पर्यविषयकर्मत्वादिबो
धके पि तत्पर्याबोधकत्वस्याविकल्पेन तस्य तद्विग्रहत्वेन किंचिद्बाधकं राज्ञः पुरुषः सुन्दर इत्यादीनां तु विग्रहत्वमिष्टमेव सौन्द
र्यादिविशेषणस्य तत्तात्पर्याविषयत्वात् कुंभं करोतीत्यादीनां तु कर्तृत्वाद्यर्णकारकाणां तेषामेव कुंभकारादिविग्रह

तमिमितिसंबंधेषु ॥

मू॰
सा॰ द॰
१५५
154

अन्यथा समानार्थकत्वाभावे तस्मान्निग्रहवाक्यात् तस्यादिति तत्समानार्थस्यैव तद्व्युत्पत्तिनिर्णायकत्वादिति भा
वः सम्बन्धेपलक्षणकत्वमुपपादयति नोत्पलमित्यादिना नीलोत्पलादिसमाससंग्रहाय समानविभक्तिकत्वमपहाय
विरुद्धविभक्तिरहितत्वमुपात्तं विरुद्धविभक्तिकयोस्तु प्रातिपदिकार्थयोरपि सोमेन यजेत स्तोकं पचतीत्यादाव
भेदान्वयप्रदर्शनायाह प्रातिपदिकार्थयोरिति तथा चाभेदसंसर्गावच्छिन्नप्रातिपदिकार्थनिष्ठप्रकारता
निरूपितविशेष्यतासम्बन्धेन शाब्दबुद्धिं प्रति विशेष्यतासम्बन्धेन विरुद्धविभक्तिरहितपदजन्योपस्थितेर्हेतुतया
तस्याश्च समासोत्तरपदार्थे पुरुषादौ सत्त्वादभेदान्वयो दुर्वार इति भावः ननु विरुद्धविभक्तिराहित्यं यथा समस

अन्यथा तस्माद्व्युत्पत्तिनिर्णयो न स्यात् नोत्यः राजसंबंधः पुरुष इति प्रसंगात् विरुद्धविभक्तिरहितप्राति
पदिकार्थयोरभेदान्वयव्युत्पत्तेरिति ॥

समाधारणे विशेषणवाचकपदस्य विशेष्यवाचकपदाप्रकृतिकविभक्त्यप्रकृतत्वमुत विशेष्यवाचकपद
स्य विशेषणवाचकपदाप्रकृतिकविभक्त्यप्रकृतित्वं विशेष्यपदाप्रकृतिकत्वस्य तादृशपदान्तरत्वस्य तदुत्तर
त्वेनाप्रतिसंधीयमानत्वस्य वा नीलो घट इत्यादौ नीलादिपदसमभिव्याहृतविभक्तौ घटादिसमभिव्याहृतविभक्तिभिन्ना
यास्सत्त्वादभेदान्वयानुपपत्तेः नीलः नीलघटमानयेत्यादावहं भवापत्तेरिति चेन्न विशेषणपदे विशेष्यवाचक
पदाप्रकृतिकविभक्त्यप्रकृतित्वमेव तत्र तदप्रकृतिकत्वं च विभक्तौ तत्प्रकृतिकविभक्तिसजातीयभिन्नत्वं साजात्यं

चविभक्तिविभाजकप्रथमात्वादिना सत्वादिना वा नीलो घट इत्यादौ नीलपदोत्तरविभक्तेर्घटादिपदसमभिव्याहृतविभक्तिभिन्नत्वेपि तत्प्रकृतिकप्रथमाविभक्तिसजातीयविभक्तिभिन्नत्वाभावेन विशेष्यवाचकपदोत्तरप्रकृतिकत्वाभावादिति नानुपपत्तिरिति वस्तुतस्तु विशेषणविभक्तेः साधुत्वमात्रार्थकत्वमिति मते विरुद्धविभक्तिराहित्यं विशेषणपदे विशेष्यवाचकपदोत्तरविभक्तिविरुद्धविभक्त्यप्रकृतित्वमेव न त्र विरुद्धत्वं च स्वार्थसंख्यापर्यभिन्नार्थकत्वं नीलो घट इत्यादौ नीलादिप्रकृतिकविभक्तेः साधुत्वमात्रार्थकतया घटादिपदप्रकृतिकस्वादिप्रत्ययार्थैकत्वादिभिन्नार्थकविभक्तिर्द्वितीयादिरूपो जस्रूपा वा न तदप्रकृतित्वस्य नीलादिपदे सत्त्वादेवं नीलघटमानयेत्यादिसमस्तस्थलेपि तादृशविरुद्धविभक्त्यप्रकृतित्वमव्याहतमिति नाभेदान्वयानुपपत्तिः अस्मिन् कल्पे च स्तोकं पचतीत्यादावपि निरुक्तविरुद्धविभक्तिराहित्यस्याक्षततया तत्राभेदान्वये व्यभिचारः अतएव समानविभक्तिकत्वस्य स्तोकं पचतीत्यादौ व्यभिचारादाह विरुद्धविभक्तीति तत्र तत्र ग्रंथकृद्भिरवतारितं पूर्वकल्पे तु स्तोकादिप्रकृतिकविभक्तेस्तिङ्जातीयभिन्नत्वाभावाभावेन न तदंत्यं तासंगतमेव स्यात् मूले प्रातिपदिकार्थयोरिति तु प्रकृत्यभिप्रायेण तथा च विरुद्धविभक्तिरहितप्रातिपदिकार्थनिष्ठाभेदसंसर्गावच्छिन्नप्रकारतानिरूपितविशेष्यतासंबंधेन शाब्दबुद्धिं प्रतितादृशप्रातिपदिकान्यतरजन्योपस्थितेर्विशेष्यतासंबंधेन हेतुत्वेनेति कार्यकारणभावः घटो न पट इत्यादौ व्यभिचारवारणाय पूर्ववन्निपातातिरिक्तत्वेनापि प्रातिपदिकं विशेष

मू०
सा० द०
१५५
155

ननु विरुद्धविभक्तिराहित्यस्याभेदान्वयबोधप्रयोजकत्वे चैत्रस्य सुतस्य धनमित्यादौ चैत्रस्य सुतेऽभेदान्वयापत्तिरत आह प्र
पंचितमिति विभक्त्यर्थमन्तर्भाव्य नामार्थान्वयस्यैवाभ्युपगन्तव्यत्वेरित्यादि न चोक्तं षष्ठ्यन्तभिन्नत्वमपि प्रातिपदिकांशे कार्य
तावच्छेदककोटौ निवेशनीयमिति तद्भावः सुतस्यैवेति समासे एकार्थीभावाभ्युपगमादेवेत्यर्थः भक्षमुद्दिश्येति
ऋत्विजो हविःशेषान्भक्षयन्तीति आमे भक्षणमनूद्येत्यर्थः एकप्रसरताभंगापत्तेरिति उद्देश्यविधेयभावेनान्व
ये पृथगुपस्थितेस्त्वावश्यकतया तदनुरोधेन तदभ्युपगमे समासे विशिष्टार्थोपस्थितिजनकत्वरूपैकप्रसरत्वहान्या
पत्तेरित्यर्थः न च मीमांसकैर्विशिष्टशक्त्यनभ्युपगमात्कथमेतदिति वाच्यं शक्तेरनभ्युपगमेऽपि विशिष्टे लक्षणाया

प्रपंचितं भूषणे सुतस्यैव वषट्कर्तुः प्रथमभक्ष इत्यत्र भक्षणमुद्दिश्य न प्राथम्यविधाने प्रोक्तमेकप्रसरता
भंगापत्तेरिति ॥

स्तैरप्यभ्युपगमेनैकप्रसरतायास्तन्मतेऽपि सत्त्वात् न चोद्देश्यतावच्छेदकत्वयोगमात्रं प्राथम्यादीनां विधेयतयान
ये च तद्वत्त्वयोगचरमत्वनिर्देशादीनां नियामकतया प्रकृते तयोरभावात्कथमुद्देश्यविधेयभावेनान्वयाय्यादन
मिति वाच्यं प्रथमो भक्षः षोडशिनो ग्राह्यणेत्यादौ सति तात्पर्ये तथा बोधस्यानुभवसिद्धतया भक्षत्रालक्षणमुद्देश्य
कप्राथम्यषोडशित्वादिविधायकशाब्दबोधे भक्षाद्युपस्थापकपदसमभिव्याहृतप्राथम्यादिवाचकपदोपस्थि
तिमात्रं नियामकमित्याशयात् उद्देश्यविधेयभावावच्छिन्नविषयतया शाब्दबोधे प्रत्ययसमस्तपदजन्य

१५५

बोधस्यते इति तत्र तदामोदरः पूज्यो राजपुरुषः सुंदरः पुत्रादौ तथात्वयानुपपत्तेः दृष्टं च तथा च प्राथम्य विशिष्टं भक्तएवांतर
मेव तत्र विधीयत इति शक्तहृत्त्वा न तत्स्व प्राथम्य विवक्षेन प्राविधेय पर्यवसानं भवतीति तत्र सिद्धांतादिति भावः अंगे इति अंगै
रित्यंगानुवादेन त्रित्वविधानार्थमित्याशंकेके हीदं समासपदं तत्सर्वमुद्देश्यबोधकं प्राथम्य विधेयबोधकं वेति युक्तं उ
त्तरखंडार्थमुद्दिश्य पूर्वपदार्थविधीयमाने प्रसरभेदात्सामर्थ्यविधानात्समासानस्यादिति त्रित्वविशिष्टांगांतरविधि
रिति दशमेवायत्नत्वोनिर्णीतमित्याखंडलार्थः सति च तस्मिं घटपदाद्घटत्वविशिष्टस्येव अंगपदात्त्रित्वविशिष्टा
गोमास्थितो नांगोद्देश्येन त्रित्वविधानसंभावना न चान्यतरस्य तत्र विशिष्टत्वात्तत्रणिकावाडक्त सिद्धांतसंगतिवाच्यं पूर्व
कारिकायां तदसंभवस्योक्तत्वादितत्वादिति भावः न तु समासघटकपदार्थेनिष्ठविधेयतानिरूपितोद्देश्यतासंबंधेन
शाब्दबुद्धिं प्रति समासघटकपदजन्योपस्थितेः प्रतिबंधकत्वकल्पनात्समुदायनिरूपितविशिष्टशक्तिमंतरेण
पितोक्तैकप्रसरताभंगः न चैतत्कल्पे प्रतिबंधकताकल्पनप्रयुक्तं गौरवमेव दोष इति वाच्यं सर्वत्र विशिष्टशक्ति
कल्पनापेक्षया क्वचित्प्रतिबंधकभावकल्पनस्यैव लघुत्वात् किंच पदपदार्थभेदेन कार्यकारणभेदाद्यत्र यत्रो
द्देश्यविधेयभावेन शाब्दान्वयः सर्वसिद्धस्तत्प्रयोजकानुपूर्वीविरहादेव प्रकृते तदायादनासंभवात्प्रतिबध्यप्र
तिबंधकभावकल्पनापि प्रतनयवयाटशांफलेक्वचित्सिद्धं तादृशस्यैवाय त्रि संभवतीति वदंतीत्यत आह संगच्छ
ते चेति विशिष्टशक्तिस्वीकारपक्षवारुणाधिकरणसंगतिर्नान्यथा पूर्वपक्षस्यैव निर्दलत्वादिति भावः न देवाविश

दध्यसमर्थोपसादिता ॥

भू॰
सा॰ द॰
१५९
156

अन्यथा समुदायशक्त्यनभ्युपगमे वाक्यादिति अरुणस्य वाक्यात् भिन्नप्रकरणे निवेशो हि करणतयावगतानि
प्रकरणाम्नातानि विशेष्यन्तयानूद्य विशेषणभूतो गुणस्तत्परिच्छेदकत्वेन विधीयेत तथा च येन द्रव्येण यत्किंचित्
क्रियते तेन तादृशकेनेति सर्वत्रत्याशयः पर्यवस्येत् न चासौ शंका संभवति तद्वाक्ये याज्ञानीत्रयाणामेवामूर्तत्वा
त् लत्तलयाद्रव्यवाचकत्वेन त्रयाणामेवावशिष्टमिति भावः उपसंहरति तस्मादिति जैमिनीयैरवश्यमभ्युपे

अन्यथारुणयापिङ्गाक्ष्यैकहायन्या सोमं क्रीणातीत्यत्रारुणपदवदितरयोरप्येकाहृत्वादिगुणमात्रवाचक
तयामूर्तत्वात्क्रीणातौ करणत्वासंभवस्य तुल्यत्वादारुण्यस्येव वाक्याद्भेदशंकाया असंभवादित्यादि प्रपंचितं वि
तं मयूखेन तस्मात्समासशक्तिर्यत्नो जैमिनीयैरवश्यमभ्युपेयः इत्यास्तां विस्तरः राजपुरुष इत्यादौ रा
जा चासौ पुरुषश्चेत्येव विग्रहः ॥

यदत्तु यसंहारेण तत्र नैयायिकोक्तदूषणोद्धृतेः सयुक्तिकत्वं ध्वनयति कथं तर्हीति चेदित्थं विशिष्टशक्त्यनभ्युपग
मे सर्वापत्तीनामुद्धृतत्वात्समासेऽर्थवत्त्वाभावनिबंधनप्रातिपदिकसंज्ञानुपपत्तिः पदं रदुषणमवशिष्यते त
दपि समासग्रहणस्य नियमार्थत्वपक्षे विधायकत्वपक्षस्येव सयुक्तिकतया तेरुपगमे नोक्तदूषणप्रसक्तेः तथा
हि प्रातिपदिकसंज्ञाविधायिका सूत्रद्वयी अर्थवदधातुरप्रत्ययः कृत्तद्धितसमासाश्चेति तत्राद्येन दृष्ट्यार्थवत्त्वाभावेनाप्रा

तिपदिकत्वेपिहि

नीयेन तत्सिद्धसंभवात् अप्रयसोदाहरणमयुक्तमत्रसाधुशब्दस्वरूपेणैव वृक्षत्यादितत्समुदायोपिईषद्समासमयटत्वा
दिमतियद्वादिशब्दलक्षणयामपिसमुदायस्यार्थवत्त्वाभावादेतत्सूत्राविषयत्वात्किं तत्र सूत्रविषयत्वेनैवतस्य तंद
र्थस्तु धातुप्रत्ययभिन्नमर्थवच्छब्दस्वरूपं प्रातिपदिकसंज्ञमिति अधातुरप्रत्ययपदयोरर्थवच्छब्दस्वरूपरूपविशेष्य
पदत्वावत्त्रैकत्वेपिन विशेषणनिष्ठत्वेन तयोः परवल्लिंगमित्यनुशासनेन तयोः पुल्लिंगतायाएवबोधनात् शक्ति
लक्षणान्यतरसंबंधेनार्थोपस्थापकत्वरूपार्थवत्त्वस्यधातुप्रत्ययोरक्षतत्वयातत्त्वावत्त्वेनायपर्युदासद्वयं प्र
त्ययोतपर्युदासस्तु प्रकृतिप्रत्ययसमुदायेऽर्थवत्त्वाभावादेवानतिप्रसंगेनादरणीयः एवंचलिङ्गयगादिश
ब्दानामप्रत्ययानामर्थवत्त्वाधातुत्वोपकृराणोपगवादिशब्दानांधातुप्रत्ययभिन्नानामर्थवत्त्वोऽश्रियदादिशब्दानाम
धातूनामर्थवत्त्वोप्रत्ययस्वरूपाणांराजपुरुषादिसमस्तपदानामपिधातुप्रत्ययभिन्नानामपिप्रमाणाभावेना
र्थस्यानामुक्तसूत्रेणप्राप्तोसंज्ञाविधानेकृत्तद्धितेतिसूत्रं प्रणिनिनायपाणिनिः अर्थवदित्यस्यतत्वात्रा
नुवृत्तिरनर्थकानामपिकेषांचित्संज्ञाविधानमेतदारंभान्वयोजनाभावाच्चात्रकृत्तद्धितेनप्रत्ययग्रहणपरिभाष
यातदंतग्रहणेसंज्ञाविधौ प्रत्ययग्रहणइतिनुकाचित्कंज्ञापकसिद्धं नसर्वत्रेतिपरिभाषणात् तद्धितग्रहणेनतो
क्तयुक्तानतद्धितांतमात्रपरंतथापत्यातिप्रातिपदिकपदवाच्यत्वरूपलसत्ताविच्छेदकाकांतेवरूपटवदृत्यादावप्याप्याप

मू॰
सा॰ द॰
१५७
157

त्रेः किं तत्स्वार्थबद्धितत्पूर्वं तत्स्वार्थबद्धितोत्तरत्वान्यतरसंबंधेन तद्धितविशिष्टप्रकृतित्तद्धितो भवद्घटितसमुदायपरमि
त्यादौ तत्प्रकृत्यनुसंधानाभावप्रसंगः वस्तुतस्तु संग्रहार्थं तद्धितघटितसमुदायमात्रपरतायां पचतकीत्यादावतिव्याप्ते
र्नैतथाभिहितं मूलके नोपदेशमित्यादौ कृत्तद्धितपरिभाषया समुदायस्य प्रातिपदिकसंज्ञातिप्रसक्तिस्तु न तस्या
गतिरनेन तरहितसूत्रस्यानेनग्रहणं ज्ञापकसिद्धं न सर्वत्रेति क्वाचित्कत्वाभ्युपगमे नैवातिप्रसंगस्य परिहार्यत्वात् न
ह्याच समासग्रहणस्याप्रामयकत्वेन विधायकतया राजपुरुषस्त्यादिवाक्यस्यार्थवत्त्वाभावेपि प्रातिपदिकसंज्ञानुपप
त्त्यभावात्समासपदकार्यीभावाभ्युपगमेनिष्प्रमाणकं अतएव नवाक्यस्य माकोशादितो न स्वशक्त्यपरिच्छेदात् य
त्र तु कोशादि शक्तिग्राहकमस्ति तत्र समासेपि तां तन्निवारयामो यथायं कजरथ्यनरादिपदेएवं च वाक्ये शक्त्य
भावे नैव प्रातिपदिकसंज्ञानतिप्रसमेस्तद्ध्याहृत्तिफलाभवेन समासग्रहणस्य नियमार्थत्वासंभवाच्च शक्ति
ग्राहकशिरोमणिनाप्रथमं शक्तिग्रहात्कथं समस्यानर्थकत्वमिति तु न व्यवहारेण प्रथमं तत्र शक्तिग्रहेप्यावा
पोद्वापाभ्यां प्रत्येकं शक्तिग्रहेण समुदायशक्तिग्रहे चं दस माध्यमिकाल्पपरिमाणग्रहे ज्योतिः शास्त्राधीनश
तयोजनस्थूदश्रतिपास्थितस्यग्रहसंभवात् प्राथमिकग्रहस्याबलवत्त्वात् ॥ ॥

एवं च प्रातिपदिकसंज्ञारूपकार्य्यमेवार्थवत्त्वमनुमापयति धूम इव वह्निमिति दिक्केवचत्रुति विभावनीयं युक्तिं चतुरैरि-
ति समानार्थत्वानुरोधादिति विक्रियमाणस्य यद्विशेष्यकयत्प्रकारकबोधजनकत्वं विग्रहस्य तत्तद्विशेष्यकत-
त्प्रकारकबोधजनकत्वं समानार्थकत्वं तदनुरोधादित्यर्थः विग्रहवाक्यान्तर्गतराजशब्दस्य राजसंबन्धिलाक्षणिक-
त्वात्त्वोक्तसमानार्थकत्वहानिः राज्ञः पुरुष इत्यस्य तत्संबन्धप्रकारकबोधजनकत्वात्त्वोक्तसमानार्थकत्वमिति न तस्य

चित्रगुरित्यादौ चित्राणां गवामयमित्येव समानार्थकत्वानुरोधात् यद्यपि प्रथमान्तानामेव बहुव्रीहिरि-
ति सूत्राल्लभ्यत इति प्रथमान्ते पक्षे वाक्यं चित्रा गावो यस्येति संभवत्येव षष्ठीति समासविधानाद्राज्ञः पुरु-
ष इति च पक्षे वाक्यं भवत्येव तथापि तस्य न विग्रहत्वं भिन्नार्थत्वात् किं नूक्तस्यैवेति मीमांसकाल्लप्रसंगात्त्रि-
रस्यति व्याख्यानेन तद्धितरूक्तौ यत्किंचिदुपदर्शकं गुणप्रधानभावादौ तत्र दृष्टो विपर्य्ययः ॥

विग्रहत्वमेवं चित्रा गावो यस्येत्यत्रापि बोध्यमिति भावः सूत्रादिति अनेकमन्यपदार्थ इति सूत्रादित्यर्थः
तत्र शेषे बहुव्रीहिरित्यधिकाराच्चषपदार्थः प्रथमान्तस्यैव संभवति यद्यपि विशेषणं विशेष्येणेति प्रथमा-
न्तस्यापि समास उक्तस्तथापि तत्र प्रथमापदोल्लेखेनेति तस्य शेषत्वमक्षतमिति भावः उक्तस्यैव चित्राणां गवा-
मयमित्यादेरेवेत्यर्थः एवकारेणोक्तप्रथमान्तस्य विग्रहत्वमव्यवच्छेदः ॥

मू॰
सा॰ द॰
१५८
158

उपदर्शकपदस्यविवरणंयत्किंचिदर्थबोधकमिति आख्यातेमितिनिर्द्दिष्टमित्यर्थः तत्र आख्यातघटितेविवरणे
व्यत्यासमेवदर्शयति तथाहीत्यादिना ननुतिपःकर्तृलाक्षणिकतयाऽक्षैर्दीव्यतीत्यत्राप्यात्तकरणकव्यापाराश्र
यत्वस्यैवबोधात्समानार्थकत्वभंगस्तत्राधीत्यतआह कृत्प्रत्ययइति कारकाणां कर्त्रादीनां प्राधान्यंप्रख्यावि

नहिकृतोर्थःकिंचिदर्थबोधकंविवरणमाख्याते तत्रविपर्ययोदृष्टः तथाहिअक्षैर्दीव्यतिकुंभंकरोतीत्य
त्रात्तकरणिकादेवनानुकूलाभावनाकुंभोत्पत्त्यनुकूलाभावनेतिबोधः आक्षिकःकुंभकारइत्यादाव
त्तकरणकव्यापाराश्रयः कुंभोत्पत्त्यनुकूलव्यापाराश्रयइतिबोधः कृत्प्रत्ययेकारकाणामाख्यातेतभा
वनायाः प्राधान्यंवदतोमीमांसकस्यापिगुणप्रधानभावांशव्यत्यासेनविवरणत्वबाधकइतिनात्रपा
त्तिकस्यचित्रागावोस्येत्यस्यविग्रहत्वेबाधकमितिभावः ननूक्तरीत्यासर्वत्रसमासेशक्तिरस्तुचतथा
विग्रहस्ताधयिषष्ठीतत्पुरुषकर्मधारययोः ॥
शेष्यत्वमित्यर्थः प्रकृतिप्रत्ययार्थयोःप्रत्ययार्थः प्रधानमितिसिद्धांतात्प्राधान्यानुरोधेनतेनभावना
याआख्यातार्थत्वोपगमादितिभावः नबाधकमितिसमानविविधविषयबोधजनकत्वस्यैवविवरणतायांतं
त्रत्वंतन्तुप्रकारत्वादिनिवेशापितत्रेतिभावः ॥ ॥ १५८

शक्तिमत्वेति एकार्थीभावविशेषादित्यर्थः सिद्धान्तसिद्धिरिति सिद्धान्तस्य मीमांसितार्थस्य सिद्धिरनुष्ठाने प्रयोगित
मित्यर्थः तथाहि निषादस्थपतिं याजयेदिति श्रूयते तत्र किं कर्मधारय उत षष्ठीतत्पुरुषो वेति संदे
हे कर्मधारये पूर्वं विद्याध्ययनकल्पनप्रयुक्तगौरवात् षष्ठीतत्पुरुषे उपपदद्वयलक्षणाकल्पने गौरवात् षष्ठीतत्पुरुषस्यैव
लाघवादिति पूर्वपक्षे तत्पुरुषस्यापि पूर्वपदलाक्षणिकतया कर्मधारयापेक्षया गुरुत्वाल्लाघवात्कर्मधारयय

शक्तिमत्वाविशेषान्निषादस्थपत्यधिकरणसिद्धान्तसिद्धिर्न स्यादत आह पर्य्यवसन्नाद्बोधाविरु
द्धमाक्रत्तणस्थिते शक्तिग्रहे तु अंतरंगत्वबहिरंगत्वचिंतनम् पर्य्यवसंस्थासोशाद्बोधस्तु तस्मादविरुद्ध
स्थासौत्तणस्तु तदानीं तत्र लाघवमादायाधिकरणाविरोध इत्यर्थः ॥

वा पूर्वं विद्याध्ययनस्योत्तरकालकल्प्यत्वेन तादृशगौरवस्य फलमुखत्वयाऽदोषत्वादिति सिद्धान्तितं विरु
द्धेन भवन्मतेन तत्पुरुषस्वीकारे गौरवानवकाशादिति भावः लाघवमिति निषादस्थपतिपदजन्यबोधा
व्यवहितपूर्वक्षणवृत्तिशक्तिग्रहेति ष्ठांतरंगवहिरंगभावचिंतनप्रयुक्तलाघवमादाय निषादस्थपत्यधि
करणसंगतिर्हंत्राविकार्थीभाववादिमत इत्यर्थः ॥ ॥

मूः
सा· द·
१५९
159

निषादरूपइतिस्थपतावित्यनेनान्वयि निषादरूपेस्थपतावित्यर्थः निषादानांस्थपतावितिनिषादसंबंधिस्थप
तावित्यर्थः तत्रषष्ठ्यर्थसंबंधांतर्भावेणैकार्थीभावाभ्युपगमात् निषादस्वामिकइतिनिषादाभिन्नस्थपतिस्वा
मिकेपुंसीत्यर्थः तत्रान्यपदार्थांतर्भावेणसमुदायशक्तेः स्वीकारादिति नानार्थेइत्यस्यकृत्स्नानेकार्थोपस्थितेर्
ज्ञातायामितिशेषः न्यायेनेत्यस्यकतात्पर्यमितिसंदेहइतीतिशेषः तत्कल्पनायां तात्पर्यकल्पनायां
पूर्वोपस्थितार्थएवेति समासघटकप्रत्येकपदशक्त्युपस्थापितार्थमात्रविषयककर्मधारयीयशक्तिग्र

हयंभावः निषादस्थपतिंयाजयेदित्यत्रनिषादस्थपतिपदेसमासशक्तिप्रवृत्तेनिषादरूपेनिषादानांस्थप
तौनिषादस्वामिकेपुरुषांतरेचसर्वत्रशक्तत्वान्नानार्थे नानार्थेतात्पर्याद्विशेषावगतिरितिन्यायेन
तत्कल्पनायांपदद्वयेनपूर्वोपस्थितएवोपस्थितिलाघवात्कल्प्यते ॥

हसंतरंगत्वेतत्वेनप्रथमोपस्थितार्थएवोपस्थितिलाघवान्निषादस्थपतिशब्दस्यनिषादरूपस्थपतावन्यथे
मवधार्यते ननुबहिर्भूतपदार्थविषयकबहिरंगशक्तिग्रहोपस्थापितेतदुपस्थितेर्विलंबितत्वादित्याखंड
लार्थः इदमपिनिरुक्तन्यायेनास्वरूपसामर्थ्यस्यग्रंथकर्त्तमतत्वेवीजं अन्यथाजहत्स्वार्थायांपदानामानर्थक्या
त्प्रत्येकपदकृत्स्नार्थोपस्थितेरसंभवेनतन्मूलकशक्तिग्रहस्यांतरंगत्वादिकथनमसंगतंस्यादिति ॥ १५५

ननु हरिणा संयोगो विप्रयोगश्चेत्यादिना संयोगादीनामेव विशेषावगतिहेतुत्वं बोध्यते न तात्पर्यस्येत्यत आह परेषामपीति
नैयायिकादीनामपीत्यर्थः तथा च नानाशक्त्युपस्थापितानामनेकेषामेकतरमात्रार्थतात्पर्यनिर्णये न निरस्ते संदेहे
तन्मात्रार्थविषयकान्वयबोधजनकाहनिशहार्थस्यानुच्छेद इति भावार्थस्य वक्ष्यमाणत्वात्संयोगादीनामपि तात्पर्य
ग्राहकतायामुपयोगोऽवसीयते इति नोक्तदोष इति भावः उभयोरत्वादिति तथा च यथा तात्पर्यानुपपत्त्या यष्टिपद
स्य लक्षणया यष्टिधरबोधकत्वं तथा प्रकृते उपस्थितिलाघवपरिगृहीततात्पर्यानुपपत्त्या निषादस्वरूपस्य पति

परेषामपीहनितात्पर्येवष्टीः प्रवेशायेत्यादौ लक्षणयाऽदुर्वारत्वात्तात्पर्यमेव कल्पकोटावशिष्यत इति दिक्

इति भूषणसारे समासशक्तिनिरूपणम् ॥

बोधकत्वं निषादस्य पतिशब्दस्येति भावः ननु जहत्स्वार्थावृत्तिपक्षे बहुव्रीहेरन्यपुरुषोन्तरंग इति व्यवहारो न यु
क्तः बहिर्विषयकपदार्थविषयकबोधजनकत्वं हि बहुव्रीहेर्बहिरंगत्वं न चात्र पक्षे तत्संभवति अन्यपदा
र्थेपि विशिष्टशक्तिसत्त्वेन स्वपदार्थबोधकत्वस्यैव सत्त्वादिति चेन्न स्वघटकपदघटितवाक्यदृष्टार्थमात्रवि
षयकत्वस्वरूपीयशक्तिग्रहापेक्षया बहुव्रीहिघटीपशक्तिग्रहस्य स्वघटकपदघटितवाक्यदृष्टार्थातिरिक्तबहि
र्भूतान्यपदार्थविषयकत्वेन बहिरंगतया तादृशव्यवहारस्योपपत्तेः एतेन षष्ठीतत्पुरुषात्कर्मधारयो लघीर

भू० सा० द० १९०

160

पातितिव्याख्याने कर्मधारयदीयशक्तिग्रहापेक्षया षष्ठीतत्पुरुषादिपदीयशक्तिग्रहस्य तद्घटकपदस्वार्थरू
पाधिकविषयतायागुरुत्वादिति ननुनिषादस्थपतिमित्यत्र स्थपतिशब्दः स्वामिपर्य्यायः श्रेष्ठपर्यायो वा
उभयथाप्यसौ गुणवचनः निषादशब्दश्च जातिवचनः तथा च जातिगुणयोः कर्मधारये गुणस्यैव पूर्वनिपा
तनियमान्निषादस्थपतिशब्दस्य कर्मधारयत्वे निषादस्थपतिमित्युक्तं स्थपतिनिषादमित्येव स्यात् किं चोभया
प्यपि स्थपतिशब्दार्थस्य नित्यसंबंधिसापेक्षत्वेन षष्ठीसमास एव न्याय्य इति कर्मधारयत्वोक्तिर्गगनकुसुमायमा
नेत्यत आह दिमिति तदर्थेऽस्ति तत्पवास्य रसालिंगदर्शनाच्चेति सूत्रेण हेत्वंतरत्वोक्तेर्न दोषः शावराचार्य्यस्तु
त्राष्येहृष्टेहि निषादानामेवोपकारकं भवति नार्य्याणामेवं च तन्निषादानामेव स्वामितितद्याचख्यौ तथा च
कर्मधारयत्वे लिंगान्निर्णीते स्थपतिशब्दस्य राजदंतादित्वात्परनिपातोऽपि बोध्यः एवं पाकोत्तानिहत्निरप्यर्थ
तो निषादानामेव स्वत्वलाभादुपपत्त्या लाघवादिविचारस्तु कथंचित्संबंधमात्रेणोपपन्न इति सर्वमन
वद्यम् इति भूषणसारदर्पणे समासशक्तिनिरूपणं ॥ ॥

प्रसंगादिति समासशक्तिनिरूपणे स्फुटतया: शक्तेरुपेक्षानर्हत्वादित्यर्थः अगृहीतवृत्तिकपदात्पदार्थोपस्थितेः शाब्द
बोधस्य चानुदयात्तद्धर्मावच्छिन्नविषयकपदार्थोपस्थितिं प्रति तद्बुद्धिं च प्रति तद्धर्मावच्छिन्नवृत्तिमत्पदज्ञानं कारणं वृत्त्या
पदजन्यपदार्थोपस्थितिस्तु तत्स्वरूपबोधजनने व्यापारः तां विना तेन तदनुत्पत्तेः तत्र वृत्तिमज्ज्ञानं ज्ञायमानं पदं अती
तानागतशाब्दानुसंधानाद्बोधानुदयप्रसंगात् वृत्तिश्च शक्तिर्लक्षणा च तत्रार्थे पदसंकेतः शक्तिः यद्यपि ल
क्षणारोपिता क्रियेति सूत्रेण सांशासंकेतितेऽर्थेऽव्यवहितार्थनिष्ठः शक्यघटितपरंपरापलक्ष्यार्थनिष्ठा सम्बन्ध
व्यापारो लक्षणेत्यर्थः केवललक्षणाया अपि संकेतात्मकत्वमुक्तं वृत्तिकृता तथापि तादृशसंकेतग्रहात्पूर्वं मे

शक्तिप्रसंगात्तस्याः स्वरूपमाह इंद्रियाणां स्वविषयेष्वनादिर्योग्यता यथा अनादिरर्थैः शब्दानां संबंधो
योग्यता तथा इन्द्रियाणां चक्षुरादीनां ॥

वस्तुशक्यगोचरोऽनुभूतसंस्कारसहितलाक्षणिकपदज्ञानमात्रेणोपस्थितेर्लक्ष्यार्थे शक्यार्थव्यवहितः संकेतोऽव्य
वधानेन गदस्मृतेः उपस्थितेऽर्थे ननु ज्ञानसंभवात् स च वक्त्रीश्वरस्यैवेति व्यक्तीभविष्यत्युपरिष्टात् न चोभयथाप्यर
सो वृत्तिः पदार्थोपस्थित्यनुपयोगात् किंतु सांतरार्थनिष्ठतया गृह्यमाणो न पदवृत्तात्पर्याभिधेयोऽसौ पदजन्यशा
ब्दबोधोपयोगितामात्रेण पदे समारोप्यत इति न कश्चिद्विरोधः स चेदं पदमिममर्थं बोधयत्विति अस्मात्पदादयम
र्थो बोद्धव्य इति चेच्छारूपस्तत्राधुनिकसंकेतः परिभाषा तथा चार्थबोधकं पदं पारिभाषिकमिति व्यवह्रियते य

थाशास्त्रकारादिसंकेतितेनदीवृद्ध्यादिपदेष्वीश्वरीयःसंकेतःशक्तिस्तयाचार्थबोधकंपदंवाचकमितिव्यवह्रियते
लक्षणाहिशक्यसंबंधःतत्कल्पिकाचमुख्यार्थबाधोन्वयीनतात्पर्यानुपपत्तिः तथाहिगंगायांघोषइत्या
दौगंगापदस्यघोषाभाववत्प्रवाहार्थकत्वेनतीरतात्पर्यकत्वेनुत्रीतेतात्पर्यविषयीभूततीरबोधेनवती
रस्मृतिंविनानुपपद्यमानेनतल्लक्षणास्वीक्रियते साचगंगापदनिरूपितवृत्तिज्ञानेविनानुपपद्यमानात्तटशाब्द
त्तिज्ञानमात्रप्रतीतितज्ज्ञानविषयेगंगापदनिरूपितावृत्तिर्नशक्तिस्तस्यास्तत्रासंभवादतस्तीरस्मारिका
गंगापदनिरूपितातीरेकाचिदन्यावृत्तिःकल्प्यतेसाचगंगापदशक्यसामीप्यरूपासैवतेनरूपेणगृह्यमाणा
तीरस्मारकत्वनुभावयतिचेति शक्यादशक्योपस्थितिर्लक्षणा उपस्थितिहेतोस्तस्यास्तत्रासंभवात् ना
पिस्वबोध्यसंबंधः समासशक्तिनिरूपणेऽक्रमुक्तेः यद्यपीश्वरेच्छायाःतन्मात्रविषयिण्यागंगापदजन्यबोधवि
षयत्वत्वेनेच्छाविषयत्वस्यतीरेबाधात्तत्रातिरिक्तलक्षणायांमानाभावः शक्त्यैवतीरबोधोपपत्तेः एवंतस्याये
वात्कटपदात्कटोद्दव्यमहस्याकारकेच्छयाःघटेपिसत्त्वादतिप्रसंगश्च तथापिगंगापदवाच्यत्वव्यवहारस्यती
एतावताभावेनगंगापदजन्यबोधविषयत्वावच्छिन्नप्रकारतानिरूपितविशेष्यतासंबंधेनेच्छैवगंगादि
पदानांशक्तिःप्रवाहादौशक्तिस्तीरादिनिष्ठविशेष्यताख्यासुगंगादिपदजन्यबोधविषयत्वप्रकारता
निरूपितत्वविशेषितत्वमालादृशविषयतात्वेनतादृशप्रकारतानिरूपितत्वमापित्सुष्ठविषयतात्वेन

तिनलक्षणोच्छेदापत्तिर्नैवातिप्रसंगो नापि विषयत्वलक्षणसंबंधस्य पदे जन्यजनकभावसंबंधे च सत्वात्तत्र तत्र वा
चत्वव्यवहारप्रसक्तिः केचित्तु शक्तिर्नेश्वरेच्छारूपोक्तातिप्रसंगात् किंतु घटपदकरणकत्वविशिष्टघटबोधविष
यकेच्छासावविशिष्टा तस्यातिरिक्तत्वाभ्युपगमात् घटे ईश्वरेच्छासत्त्वेपि घटपदकरणकत्वविशिष्टघटबोधविष
यकेच्छात्वेन तत्र तदनभ्युपगमान्नातिप्रसंगः न चैवं वाच्यत्वस्य केवलान्वयित्वानुपपत्तिः तदादिपदवाच्य
त्वस्य तथात्वादित्याहुस्तन्न एकस्यैव समवायस्य घटीयत्वाद्यवच्छेदेन रूपादिसंबंधतावदेकस्या एवेच्छाया घ
टाद्यवच्छेदेन घटादिपदसंबंधतासंभवादिति ॥ लक्ष्योपस्थितिनियामकः स च संबंधः सादृश्यातिरिक्तः शुद्ध
लक्षणेति व्यवह्रियते सादृश्यात्मकस्तु गौणीति शुद्धाप्युपादानलक्षणत्वाभ्यां द्विधा उपादानत्वं च स्वस्यार्थ
संसृष्टान्यार्थोपस्थापकत्वं यथा यष्टीः प्रवेशयेत्यादौ इयमेवाजहत्स्वार्थेति व्यवह्रियते लक्षणत्वं
नशक्याविषयकार्थोपस्थापकत्वं यथा गंगायां घोष इत्यादौ गंगानिरूपितसामीप्यादेस्तीरमात्रोपस्था
पकत्वात् व्यवह्रियते चेयं जहत्स्वार्थेति अन्ये पुनरारोपाध्यवसानाभ्यां शुद्धा गौणी च द्वैविध्यमामनंति
तत्र विषयस्यानपह्नुताभेदारोप्योपस्थापकत्वमारोपः यथा शुद्धौ तु गौर्वाहीक इत्यादौ विषयस्यापह्नुताभे
दारोप्योपस्थापकत्वमध्यवसानं यथा पुरिदं गौरयमित्यादौ तस्मादिच्छैव शक्तिरिति नैयायिकाः प्रीमां

मू॰
सा॰द॰
१८२

182

सकाशत्वान्नानार्थकपदस्योक्तयुक्त्यावाचकत्वपरिहारेपीश्वरानंगीकर्तॄणां शाब्दबोधानुपपत्तेरीश्वरसंकेतस्य न शक्तित्वे
न विवक्षायामीश्वरीयत्वमनुपादेयं एवं चाधुनिकसंकेतज्ञानादपि शाब्दबोधोपपत्त्यातादृशसंकेतस्य वृत्तिता
निर्वाहः आधुनिकसंकेतत्वेन तात्पर्यस्यापि वृत्तित्वप्रसंगस्तन्न पदार्थोपस्थितिनियामकसंकेतस्यैव वृत्तित्वेन
तात्पर्यज्ञानस्यातस्यातथात्वात् तस्य साक्षादेव शाब्दजनकतया पदार्थोपस्थित्यात्मकव्यापारानपेक्षणात्
वृत्त्योपस्थितार्थ एव प्रकरणादिना वक्तृतात्पर्यावधारणात् तत्पुरुषसंकेतितनतडुत्तरितडित्यादिपदेष्वा
धुनिकसंकेतस्य तत्पुरुषवाक्यादितः प्रागवधारणेन पदार्थोपस्थितिप्राक्काले तत्स्मरणसंभवात्पदार्थस्मा
रकतया तस्यापि वृत्तितानपायादिति चेदेवमपि संकेतस्य संबंधत्वे मानाभावेन तिप्रतियौगिकतया तदसं
भवेन च पदार्थोपस्थापकत्वासंभवेन वृत्तित्वानिर्वाहात् तस्मात्पदपदार्थयोः पदार्थान्तरसंबंध एव
वाच्यवाचकभावः इति वदन्ति इदमेवमतं नव्यनैयायिकैरादृतं तदेतन्नानामतनिराकरणपरतां मू
लस्याविष्कुर्वन्नाह तस्याः स्वरूपमिति ॥

तस्याः शक्तेः स्वविषयेऽस्तीति स्वजन्यबोधविषयेऽस्तीति मूलस्य पदार्थस्तमेवाह वाच्य इत्यस्तीति वाच्यत्वमयं दृष्टान्तवादिप्रत्य
त्नविषयस्याप्युपलक्षणं अनादिरिति अनादित्वं स्वभावसिद्धत्वं तच्च स्वप्रतियोगिकध्वंसाधिकरणकालवृत्तित्वं सर्वं
ये तत्स्वजन्यबोधसमानाकारबोधवत्त्वमतएवस्यस्याधुनिकदेवदत्तादिपदे तदभावादिति यत्तेनानादित्वमजन्यत्वं
तच्च तद्बोधकारणतावच्छेदकतयोग्यताविशेषणं कारणत्वस्य कार्य्याव्यवहितपूर्ववृत्तित्वव्यवच्छिन्नकार्य्याधिकरणवृत्त्य
भावप्रतियोगितानवच्छेदकधर्मवत्त्वरूपस्यातिरिक्तपदार्थस्यवाग्नत्वत्वेनाव्याप्तत्वेनकत्वादिति तिरस्ते बोधकारण
तैवेति यद्यपि बोधकारणत्वस्य घटादावतिव्याप्त्यादिदमनुपपन्नं तथापि ज्ञायमानशब्दस्य करणत्वमिति मताव

स्वविषयेषु वाच्यत्वेषु घटादिषु यथा मादियोग्यतानदीयवाच्यत्वकारणतानथाशङ्कानामप्यर्थः सहृतद्बोध
कारणतैव योग्यतासैव शक्तिरित्यर्थः ननु बोधकारणत्वमनादि भूजं नु शक्तिराधुनिकदेवदत्तादिपदे तद
भावात् अन्यथापि त्रादिसंकेतात्तानेप्यन्वयबोधप्रसंगः ॥

ष्टेमेतत्तथोक्तं यदन्ता
तस्यैव करणत्वमिति मतेनयो
ग्यतापदं कारणीभूतज्ञानविषयत्वपरं तथाच कारणीभूतज्ञानविषयत्वमेव शक्तिरित्यर्थात्त्र दोषः संकेतज्ञानमे
तरशक्तिग्रहणासंभवेनतस्यावश्यापेक्षणीयतयातस्येव शक्तित्वमस्तु तद्धेतोरितिस्यापादित्याशंकते नन्वि
ति अनादिभूमिति स्वजन्यबोधसमानाकारपूर्ववोधवृत्त्वविशिष्टमित्यर्थः तत्र हेतुमाह आधुनिकेति इ
दानींतनसंकेतितेत्यर्थः तदभावात् निरुक्तानादित्वाभावादित्यर्थः तथाच तादृशविशेषणस्यतत्राभावेन

तत्र शुक्तिविशिष्टाभावात्संकेतकगोव्यभिचारादित्यर्थः ॥

मू॰ सा॰द॰ १६३
163

लाक्षणिकेति तदभावादित्यनेनान्तरं बोध्यं अतिव्याप्तेश्चेति तस्यापि तीरादिपदार्थबोधयोग्यत्वादित्यर्थः अतिव्याप्तिक
र्थं तत्स्वीयत्वासत्त्वपाते: शाक्यलाक्षणिकयोर्भेदानुपगमादिति बोध्यं तत्र बोधकारणत्वमेव शक्तिस्तस्यानादित्वोक्ती
र्त्तनेनत्वघटादिपदाभिप्रायेणेत्यत आह अन्यथेत्यस्य किंचेत्यादिः अन्यथा संकेतनिरपेक्षस्यैव बोधयोग्यत्वस्वीकाराद्
बोधोपयिकत्वे इत्यर्थः पित्रादिसंकेतितेति देवदत्तादिपदमिममर्थं बोधयत्विति संकेतात्तात्तेनेपीत्यर्थः आ
वश्यकत्वात् योग्यताज्ञानोपपत्तये अवश्यापेक्षणीयत्वादित्यर्थः सचेति संकेतश्चेत्यर्थः संकेतस्य स्वरूपेणाप

लाक्षणिकातिव्याप्तेश्चेति संकेतज्ञानमपि हेतुर्वाच्यस्तथा चावश्यकत्वात्स्य एव शक्तिरस्तु स एवाभिधेति केचित्त्रा
देर्गवादौ चेत्सा स्यादेवेति चेत् उच्यते संकेतो न स्वरूपेण हेतुः अगृहीतशक्तिकादर्थबोधप्रसंगात् नापि सा
मान्यतो ज्ञातः अप्रमेयत्वादिनाज्ञातेऽपि बोधप्रसंगात् नापि संकेतत्वेन तज्ज्ञानं हेतुः गवादिपदे षष्ठीस्वरी
पसंकेतत्वेन ॥

पदार्थोपस्थित्यादिहेतुत्वं सामान्यतो वा विशेषरूपेण वेति विकल्प्याह्र दूषयति उच्यत इत्यादिना स्वरूपेणेति स्व
नरूपेण संकेतत्वेन दंडत्वादिना दंड इव घटे इत्यर्थः ज्ञानाविषयपदस्वरूपसम्बोधे हेतुरिति सम्पादितार्थः अगृ
हीतशक्तिकादिति अज्ञातसंकेतादित्यर्थः बोधप्रसंगादिति संकेताग्रहेऽपि संकेतस्य स्वरूपतः सत्त्वविद्यमानत्वादि
त्यर्थः सामान्यइति साधारणधर्मेणेत्यर्थः। संकेतत्वादिनरहितधर्मेणेति यावत् संकेतत्वेनेति पश्चरास्मदीयसंके

तस्मात्तहितिधर्मप्रकारकं संकेतज्ञानमित्यर्थः ॥

तज्ज्ञानसत्त्वानामिति संकेते ईश्वरीयत्वमविदुषामित्यर्थः मीमांसकैरीश्वरानङ्गीकारेण तद्घटितोक्तरूपेण संकेतज्ञानसत्त्वे
षामसंभवाद्व्यतिरेकव्यभिचारेण तस्य कारणत्वानुपपत्तेरित्यर्थः लौकिकपदमनधीतशास्त्रपरं ईश्वरस्य शास्त्रैकसम
धिगम्यत्वादिभावः यद्यपि संकेतत्वेन तज्ज्ञानकारणतायां नेश्वरीयत्वेनास्मदीयत्वेन वा संकेतनिवेशो येनेश्वरज्ञानस्या
प्यपेक्षा तथापि तत्त्वेन निवेश इत्यभिमानेनेदमुक्तमिति बोध्यम् ननु शक्तिग्रहरूपकारणाभावान्नेषां बोधोपि कथ
मत आह तत्तदर्थेति अर्थधीजनकेति अर्थबोधजनकतानिरूपितताया विषयतासंबंधावच्छिन्नावच्छेदकता। ततोपी,

तज्ज्ञानसत्त्वानां लौकिकमीमांसकानां तत्तदर्थबोधजनकत्वग्रहवतामेव बोधोदयेन व्यभिचारात् नचा
र्थधीजनकतावच्छेदकत्वेन तज्ज्ञाने तथात्ततोपि लाघवेनार्थधीजनकत्वेन हेतुतायामस्मन्मते क्षतिरिति
वेः नचाधुनिकदेवदत्तादिपदे संकेतज्ञानादेव बोधेनास्य व्यभिचारस्त ॥

दकतात्तयेत्यर्थः तज्ज्ञाने संकेतज्ञाने तथा हेतुः ततोपीति अर्थधीजनकतानिरूपितविषयतासंबंधावच्छिन्ना
वच्छेदकत्वायेत्तयार्थधीजनकत्वस्यैव लाघवेन हेतुतौचित्ये न वैयाकरणाभिमतार्थसिद्धेरित्यर्थः अत एव नानार्थस्य
लेनानुगतप्रकरणादीनां न हेतुता नानात्वेनोरितिन्यायात् तात्पर्यग्राहकत्वेन तेषामनुगमे च तदपेक्षया तात्पर्यज्ञानस्यैव
हेतुत्वेनेत्यपत्रोक्तमिति संकेतज्ञानादेवेति एवकारेणार्थधीजनकत्वज्ञानव्यवच्छेदः व्यभिचारः व्यतिरेकव्यभिचारः ॥

तत्रापि संकेतज्ञानमात्रादर्थबोधस्थलेपीत्यर्थः इच्छाग्रहे इति तत्पदविशेष्यकतदर्थबोधकत्वप्रकारकेच्छारूपसंके
तविषयकग्रह इत्यर्थः अवगाहनेनेति विषयीकरणेनेत्यर्थः ज्ञानेच्छादिविषयकज्ञानस्य तद्विषयविषयकत्वनिय
मादिति भावः स्वातन्त्र्येणेति इतराविशेषणत्वेनेत्यर्थः बोधकताज्ञानमिति इदमेतदर्थबोधकमित्याकारकमि
त्यर्थः अन्यथेति इच्छांशेविशेषणीभूतार्थधीजनकत्वविषयकत्वेनबोधकताज्ञानस्य शाब्दबोधहेतुत्व इत्यर्थः

त्रापीदंपदमिममर्थंबोधयत्वितीच्छाग्रहे तदर्थबोधकत्वस्यावगाहनेन व्यभिचाराभावात् न च स्वातन्त्र्येण
बोधकताज्ञानं कारणं वाच्यं अन्यथा नेदं तद्धीजनकमिति ग्रहवतोस्माच्छब्दादयमर्थो बुद्धोनेनेति ॥

इष्टापत्तिनिराकरणायाह नेदं तद्धीजनकमितीति अस्माच्छब्दादितियतच्छब्दजन्यैतत्कर्तृकबोधविषयोयमर्थ इ
त्याकारकग्रहवत इत्यर्थः पदविशेषैकार्थधीजनकत्वाभावग्रहे विषयमात्रेपदांशेऽर्थधीजनकत्वावगाहिन इदं पद
मर्थधीजनकत्वेन बुद्धमनेनेति ज्ञानासंभवात्तदपहायास्मादिति तथा वै तादृशज्ञानग्राह्याभावानवगाहितया
त्र तस्याः प्रतिबंधकत्वासंभवेनैतादृशज्ञानस्यसंभवेन किंचिद्बाधकमिति भावः ॥

जानत इति उक्तज्ञानाश्रयस्येत्यर्थः तन्नुहायत्नेरिति कर्त्रंशे विशेषणतायत्तज्ञानस्यापि बोधकत्वग्रहात्मकत्वापत्तेरित्यर
र्थः इदंपदमिममर्थं बोधयत्विति संकेतग्रहस्य तन्मते बोधकत्वावगाहित्ववदेतस्यापि तथात्वसंभवादिति भावः ननू
क्तज्ञानस्य विषयविषयकत्वेपि तत्तत्पदांशेर्थबोधकत्वे विषयीकर्त्रंशे हशाकं तद्विषयधिया बोधांशे यदजन्यत्वस्या
र्थांशे च तादृशबोधविषयत्वस्य विषयीकरणादिति कथं पदांशेऽर्थधीजनकत्वावगाहित्वमापाद्यते यदि च ता
दृशज्ञानस्य तथात्वेपि तुल्यवित्तिवेद्यतया पदांशेर्थधीबोधकत्वावगाहनात्तद्दोष इति विभाव्यते एवमपि पदां

जानतस्तन्नुहायत्नेरिति वाच्यं ॥

शे तस्यार्थबोधकत्वावगाहित्वं दुर्लभमेव तत्प्रतिबंधकीभूतस्य ग्राह्याभावावगाहिनो नेदं तद्धीजनकमिति ज्ञान
स्य जागरूकत्वात् तुल्यवित्तिवेद्यतया तज्ज्ञाने मानाभावाच्च न च पदनिष्ठार्थधीजनकत्ववदर्थनिष्ठपदजन्यबो
धविषयत्वमपि शक्तिरुभयत्र तानदपि पदार्थोपस्थिते रन्वयबोधस्य च सर्वानुभवसिद्धत्वात् कार्यतावच्छेदक
कोटावव्यवहितोत्तरत्वनिवेशात्परस्परजन्यपदार्थोपस्थित्यादौ व्यभिचार इति वाच्यं तथा सति ग्राह्याभावाग
नवगाहिनो नेदमर्थधीजनकमिति ज्ञानस्य प्रतिबंधकत्वेनोपन्यासस्य वैयर्थ्यापत्तेरिति चेन्न ॥ ॥

भू॰
सा॰ द॰
१८५
165

तादृशज्ञानस्योभयविषयशक्तिग्रहं प्रत्यन्वयव्यतिरेकाभ्यां प्रतिबंधकत्वमित्याशयेन तस्याभिधाने नानुपपत्त्यभावादिति
समापन्ने बोधे नेति अप्रामाण्यज्ञानानास्कंदिततिरस्कृतनिर्णयात्मकप्रतिबंधकसद्भावे नेत्यर्थः इदमुपलक्षणमयम
र्थोनैतत्पदबोध्यइत्याकारकज्ञानस्यापि तस्याप्युक्तोभयविषयशक्तिग्रहप्रतिबंधकत्वस्याविनिगमनाविरहेणसं
भवात् तदुद्धारासंभवादिति यदाविशेष्यकस्यार्थविशेष्यकत्वावाशक्तिग्रहस्यासंभवादित्यर्थः अन्यथा बाधग्रह
स्यतत्रप्रतिबंधकत्वानभ्युपगमे भ्रांतिजस्येत्यत्र दोषाभाववत्त्वस्य लक्ष्यते भ्रांतत्वापत्तिरिति भ्रमविषयस्य तदभावव
तितद्वत्त्वस्य भ्रमविषयकज्ञानेनाप्यवगाहनसंभवादिति भावः अत्रेदं चिंत्यं ज्ञानज्ञानस्य ज्ञानलक्षणया ज्ञानविष

तेदेतद्दीनत्वकमितिग्रहवतो बाधेन परग्रहे ज्ञानतोपि तदुद्धारासंभवात् अन्यथा भ्रांतिजस्यापि भ्रांतत्वापत्ति
रिति ॥

यविषयकत्वेपि तत्त्वरजतत्वाभाववति रजतत्वप्रकारकत्वमवगाहते किंतु ज्ञानांशे रजतत्वाभा
ववद्विशेष्यकत्वावच्छेदेन रजतत्वप्रकारकत्वे रजतत्वाभाववद्विशेष्यकरजतत्वप्रकारकज्ञानवानहमित्ये
वानुव्यवसायात् ननु रजतत्वाभाववति रजतत्वज्ञानवानिति अनयवतासूर्य्यविषयसंसर्गज्ञानपूर्वकत्वेप
दपक्षकानुमानेनावगतेपिनेतरपदार्थेभिमतसंसर्गसिद्धिः ज्ञानेन तत्पदार्थेनासंख्येविषयीभूतसंसर्गस्यावि
षयीकरणादित्यस्वरसात्पदार्थपक्षकानुमानमेव वनारिंतं तथाच संकेतज्ञानस्यार्थधीजनकत्वविषयकत्वे
पिपदांशेनेतत्स्याविषयीकरणादाभुक्तिकदेवदत्तादिपदे संकेतमात्रहेण बोधजनके बोधकत्वाशक्तिवादिम

नेत्यभिकाण्डुर्वीरपर्वतेति ॥

१८५

तद्ग्राहकमाह इदंचेति शक्तित्वेनाभ्युपेतंबोधकत्वमेवेत्यर्थः पित्रादिसंकेतज्ञानादिति पित्रादीत्यादिपदादुत्तमाप्त
व्याकरणादिरूपशक्तिग्राहकसंग्रहः कार्य्यतावच्छेदकेऽव्यवहितोत्तरत्वनिवेशाच्च नसंकेतज्ञानादीनांशक्तिग्रहेव्य
रस्यरेव्यभिचारइति भावः पूर्वोक्तंलाक्षणिकोच्छेदापत्तिमिष्टत्वेनपरिहरति नापीति शक्तीति शक्तिग्राहक
व्यवहारादिनाशक्यइवलक्ष्येपिबोधकत्वस्यग्रहादित्यर्थः ननुलक्षणानंगीकर्तृनयेशक्यलक्ष्यव्यवहारान्नपप

इदंचार्थधीजनकत्वेपित्रादिसंकेतज्ञानाद्गृह्यतेः नलक्ष्यज्ञानात्पूर्वंनबोधः नापिलाक्षणिकोच्छेदापत्तिरिष्ट
त्वात् शक्तिग्राहकस्यमुख्यलक्ष्यसाधारणत्वात् किंच प्रत्यक्षादिजन्योपस्थितेः शाब्दबोधानंगत्वाच्छाब्द
बोधंप्रतिशक्तिजन्योपस्थितेर्लक्षणाजन्योपस्थितेश्च कारणंवाच्यंतथाचकारणभावद्वयकल्पनेगौ
रवंस्यादस्माकंपुनः शक्तिजन्योपस्थितित्वेनैवहेतुतेति ॥

त्तिःव्यवहर्तृव्यभेदस्यतत्रप्रयोजकत्वादतोनार्थधीजनकत्वंशक्यलक्ष्यसाधारणंशक्तिः किंतुलक्ष्यव्यावृत्ताःसं
केतादिरूपैवसातथाचलक्ष्योपस्थितयेशक्यसंबंधरूपालक्षणावृत्तिरप्यवश्यमभ्युपेयेत्यतआह किंचेति
शाब्दबोधानंगत्वादिति तदजनकत्वादित्यर्थः घटादिपदागृहीतशक्तिकस्यघटपदश्रवणेप्रत्यक्षादिनोपस्थिते
पिघटेशाब्दबोधानुदयादन्वयव्यभिचारेणप्रत्यक्षाद्युपस्थितेःशाब्दबोधाहेतुत्वादित्यर्थः ॥

लाघवमिति तथा च लाघवसहकृतेनोक्तप्रमाणेन लक्षणायाः शक्यार्थधीजनकत्वस्य शक्तित्वसिद्धौ वृत्तिद्वयांगीकारेप्यति
रर्थकः शक्यलक्ष्यव्यवहारस्य प्रसिद्ध्याप्रसिद्धिनिबंधनत्वेनैतदनुपपत्तिरपीति भावः शक्त्यतिरिक्ते ह्यभ्युपगमे
शाब्दबोधवृत्तिज्ञानयोः कार्यकारणभावव्यवस्थैव च इत्याह अपि चेति व्यभिचारो व्यतिरेके न मे बोधपदादयति
शक्तिजन्योपस्थितिं विनापीति अव्यवहितोत्तरत्वसंबंधेनेति नत्वस्वध्वंसानधिकरणक्षणानुत्पत्तिकत्वेन

लाघवम् अपि च लक्षणावृत्तिस्वीकारे कार्यकारणभावस्य मम मते के व्यभिचारः शक्तिजन्योपस्थितिं वि
नापि लक्षणाजन्योपस्थितेः शाब्दबोधात् न चाव्यवहितोत्तरत्वसंबंधेन तदुपस्थितिमत्त्वं कार्यतावच्छे
दकं तदुपस्थितित्वं च कारणतावच्छेदकं ॥

तिस्वाधिकरणक्षणोत्पत्तिकत्वं अत्र स्वपदं शक्तिज्ञानादिजन्योपस्थितिपरं लक्षणाज्ञानजपदार्थोपस्थितिप्रा
गवृत्तिशक्तिज्ञानजशाब्दबोधादौ व्यभिचारवारणाय विशेष्यं एवंच शाब्दबोधानंतरं लक्षणाज्ञानजपदार्थोपस्थि
तिजशाब्दबोधे व्यभिचारवारणाय सत्यंतं लक्षणाज्ञानजउपस्थितिजशाब्दबोधे स्वोक्तसंबंधेन शक्तिज्ञानजो
पस्थितिवैशिष्ट्याभावान्न कार्यतावच्छेदकाक्रान्तत्वमिति न व्यभिचार इति भावः ॥ ॥

अनेन कार्य्यकारणभावप्रसंगादिति स्वत्वस्य तन्त्रघटकविशेषं तत्तत्पदानन्तर्गतत्वेन तद्घटितान्याव्यवहितोत्तरत्वस्याप्यनन्तर्ग
तत्तत्पदानेन संबंधेनोपस्थितिमत्त्वस्य कार्य्यतावच्छेदककोटौ निवेशात् कार्य्यकारणभावानंत्यमिति भावः ननु स्वव्य
वहितोत्तरत्वेन स्वत्वघटितत्वे येनोक्तदोषः प्रसज्येत अप्रसिद्धपदघटितसंबंधस्याप्रसिद्धसंबंधत्वाभावेनैवानतिप्रसंगे
तत्त्वस्य परिचायकमात्रत्वादत आह किं चेति उपस्थितिप्रतीत्यापि नापूर्वोक्तदूषणसमुच्चयः हेत्वन्तरेऽत्यस्य वाच्यत्वमिति शे
षः प्राग्वदेवेति यथा शक्तिज्ञानजन्योपस्थितिं विनापि लक्षणाजन्योपस्थित्यापि शाब्दबोधजननान्नान्वयव्यभिचा,

अनेन कार्य्यकारणभावप्रसंगात् किं च पदार्थोपस्थितिं प्रत्यपि शक्तिज्ञानत्वेन लक्षणाज्ञानत्वेन च हेतुत्वे
तिव्यभिचारे गौरवं च प्राग्वदेवेति द्रष्टव्यं नचेदं यदमेतदर्थबोधजनकमिति शक्तिज्ञानकार्य्यकारणभाव
कल्पनेऽपि पदतदर्थभेदेन कार्य्यकारणभावकल्पने गौरवं तत्रापि समानं ॥

नान्वयजन्योपस्थितेर्हेतुतायां व्यभिचारस्तथा शक्तिज्ञानमेतदेकलापि लक्षणाज्ञानेन पदार्थोपस्थितिजननात्तस्य त
दुपस्थितिहेतुतायां व्यभिचारः अव्यवहितोत्तरत्वसंबंधेन तदुपस्थितिमत्त्वस्य कार्य्यतावच्छेदकत्वांगीकारेण गौरव
मिति भावः सामान्यतः शक्तिज्ञानस्य पदार्थोपस्थितिशाब्दबोधयोर्हेतुताकल्पनयैक शक्तिज्ञानादपरपदार्थोप
स्थितिशाब्दबोधयोरायत्त्याशक्तिज्ञानमात्रस्य न हेतुत्ववादिनापि तत्तत्पदार्थोपस्थितितच्छाब्दबोधयोस्तत्तत्पदीयत
त्तदर्थशक्तिग्रहत्वेनैव हेतुतावाच्यातथा च पदपदार्थभेदेन कार्य्यकारणभावावश्यकत्वे का स्वत्वघटने गौरवमित्याशंका

विरहे नवेति ॥

ननुतत्तत्पदतत्तदर्थभेदेनापिकार्य्यकारणभावोपिनसंभवति घटपदशक्तिग्रहंविनापिकलशपदाद्घटोपस्थितिशाब्द
बोधयोरुदयेनव्यभिचारादतआह परस्परेति नवापिसाम्यात् तवापि लक्षणास्वीकर्त्तुरपिवृत्तित्वंशक्तित्वापेक्षया
पदिलिप्सुनिर्वक्तुमशक्येनतदोक्तरीत्याकार्य्यकारणभावकल्पनापिस्यात्तदेवतुनसंभवतीत्याह शक्तिलक्षणान्यतर
त्वस्येति शक्तिभिन्नत्वेसतिलक्षणाभिन्नत्वंयत्नाद्भिन्नत्वरूपस्येत्यर्थः शाब्दबोधानुकूलेत्यादिपदपदार्थसंबंधत्वस्य

परस्परव्यभिचारवारणायाव्यवहितोत्तरत्वघटितत्वेचसुतरामितिवाच्यं शक्तिग्रहानुरोधेनतत्तत्पदतत्तदर्थ
भेदेनकार्य्यकारणभावानंत्यस्यतवापिसाम्यात् लक्षणाज्ञानकार्यकारणभावकल्पनागौरवंपरंतवातिरि
च्यते अथवृत्तिजन्योपस्थितित्वेनैवशाब्दबोधेहेतुतावृत्तिज्ञानत्वेनचपदार्थोपस्थितिकारणतेत्येवंमयावाच्य
मितिचेन्न शक्तिलक्षणान्यतरत्वस्यशाब्दबोधानुकूलपदार्थोपस्थित्यनुकूलपदपदार्थसंबंधत्वस्यचाकार
णतानवच्छेदकत्वात् शक्तित्वमपेक्ष्यगुरुत्वात् ॥

परिचायकतयाप्रदर्शितं ता[illegible] त्वमात्रस्यैवसम्यक्त्वात् नचते
नरूपेणनिवेशः संभवतिबोधकताभिन्नस्यास्माभिः पदपदार्थयोः संबंधत्वानंगीकारादितिभावः गुरुत्वादिति बो
धजनकतात्वमपेक्ष्यगुरुत्वादित्यर्थः इदंचकारणत्वमखंडोपाधिरित्यभिप्रेत्य अन्यथानन्यथासिद्धत्वेसतिकार्या
व्यवहितपूर्ववृत्तित्वावच्छिन्नकार्य्याधिकरणवृत्त्यभावप्रतियोगितानवच्छेदकधर्मवत्त्वापेक्षयानिरुक्तवृत्तित्वस्यैवलघु

द्वितीयकल्पेयथाश्रुतेदूषणमाह शाब्दहेतुत्वेति हेतुतावच्छेदकोपस्थितिमंतरेणहेतुतायाऽग्रहत्वेनपदार्थोपस्थितेः
प्राक्शाब्दहेतुपदार्थोपस्थितिघटितस्योक्तरूपहेतुत्वकार्यकारणभावग्रहासंभवादित्यर्थः समापीति लक्ष
णांगीकर्त्तुरपीत्यर्थः शक्तिरपीति शक्यसंबंधरूपलक्षणायाःशक्तिघटितत्वात् ज्ञानस्यविषयतः शक्तिविषय
कत्वेनतेनरूपेणकारणतायांव्यभिचाराप्रसक्तेः कार्याधिकरणेकारणतावच्छेदकधर्मावृत्तित्वाभावस्यैवव्यभि
चारपदार्थत्वादितिभावः विषयमनिवेश्यैवयदि शक्तिज्ञानस्यपदार्थोपस्थितिशाब्दबोधयोश्चकार्यकारणभा

शाब्दबोधहेतुतावच्छेदकस्यपदार्थोपस्थितिहेतुत्वेरज्ञानेतद्घटितकार्यकारणभावग्रहस्यासंभवात् अथ
समापिशक्तिज्ञानत्वेनैवहेतुता शक्यसंबंधरूपायां लक्षणायांशक्तेरपिप्रवेशादितिचेन्न शक्तिज्ञान
पदार्थोपस्थित्योः कार्यकारणभावेसमानविषयकत्वस्यावश्यकत्वात् अन्यथागंगानीरयोः ॥

वःस्यात्स्यादप्युक्तप्रकारः सघवनसंभवतीत्याह शक्तिज्ञानपदार्थोपस्थित्योरिति समानेति तदर्थविषयको
पस्थितिंप्रतितदर्थनिरूपिततत्पदनिष्ठशक्तिज्ञानत्वेनहेतुताया अवश्यकल्पनीयत्वादित्यर्थः आवश्यक
त्वमेवदर्शयति अन्यथेत्यादिना अन्यथा शक्तिज्ञानपदार्थोपस्थित्योःकार्यकारणभावेकार्यतावच्छेद
ककारणतावच्छेदककोटौसमानविषयकत्वानिवेशेइत्यर्थः ॥ ॥

मू॰
सा॰ द॰
१९८
148

संबंधाग्रहवतन्तु इत्यनेनतदानीं लक्षणाज्ञानसत्वं दर्शयति गंगापदेइति प्रवाहरूपार्थनिरूपितबोधकत्वरूपशक्तिगंगा
पदेज्ञाततइत्यर्थः तीरबोधप्रसंगइति तीरोपस्थितेस्तद्वारकतच्छाब्दबोधस्यचापत्तिरित्यर्थः ननुशक्तिज्ञानपदार्थोपस्थि
त्योः कार्य्यकारणभावोविषयमन्तर्भाव्यैवोपस्थितिशाब्दयोस्त्विति प्रसंगनिरासायतद्घटितः सः तथाचतच्छाब्दबोधेतत्प्र
दीपवृत्तिज्ञानजन्यतदुपस्थितेर्हेतुतयातद्वृत्तिज्ञानजन्यतीरोपस्थित्यभावादेवनतीरशाब्दबोधापत्तिःदत्तासंभवोत
आह स्यापिचेति इत्यादि पदस्यतोपदवृत्तिज्ञानजन्यबोधपयन्तयेत्यादि स्तनेवांकविषयकत्वमादायघटमानयेतिवाक्यादि

संबंधाग्रहवतोगंगापदशक्तिज्ञानतोपिगंगायांघोषइतिवाक्यात्तीरबोधप्रसंगः शक्तिज्ञानस्यहेतोःसत्वात्
स्यापिचघटमानयेतिवाक्यंइत्यादि तंचस्मरतोघटादिपदेभ्योघटादेर्गतादिमिपकस्यचसमूहालंबनस्मरणेव
वतोघटानयनवद्यदिपकस्यापिशाब्दबोधापत्तिः समूहालंबनरूपायापदार्थोपस्थितेर्वृत्तिजन्यत्वस
त्वात् तथाचविषयतयाशाब्दबोधेप्रतितदंशविषयकवृत्तिजन्योपस्थितिर्हेतुरितिवाच्यंएवंचलक्षणा
यामपिशक्तिज्ञानत्वेनहेतुत्वमसंभवदुक्तिकमिति ॥ मूहस्यालंबनेविषयोयस्माइत्य

तिसमूहालंबनेति पदार्थस
र्थः बोधापत्तिरिति तद्वद्दृष्टापत्तिःस्वनुभवविरोधादितिभावः वृत्तिजन्योपस्थितिरिति तदंशविषयकवृत्तिज्ञानज
न्योपस्थितीत्यर्थः तथाचवृत्तिज्ञानपदार्थोपस्थितिशाब्दबोधानांसमानविषयकत्वेनकार्य्यकारणभावस्यावश्यक
त्वमितिभावःउपसंहरतिएवंचेति एतेनेति तदंशविषयकशाब्दबोधेतदंशविषयकवृत्तिज्ञानजन्योपस्थितेर्हेतु

लक्षणेतेत्यर्थः ॥

१९८

शक्तिप्रयोज्येवेति लक्षणज्ञानस्यापि शक्तिज्ञानत्वेनैव हेतुता शक्तिज्ञानजन्योपस्थिताविव लक्षणज्ञानजन्योपस्थिता
वपि शक्तिप्रयोज्यत्वसत्त्वान्न काचिदनुपपत्तिरिति भावः अनतिप्रसक्तेति जन्यतज्जन्यसाधारणस्यानुगतानतिप्र
सक्तस्य दुर्निर्वचत्वादित्यर्थः जन्यजन्यत्वरूपस्य तस्योपादाने साक्षाज्जन्योपस्थितेरसंग्रहः साक्षाज्जन्यत्वस्योपादाने
जन्यजन्योपस्थितेरसंग्रहः स्वरूपसंबंधात्मकस्य तु तस्योभयसाधारण्ये प्रागेवासंभवीति भावः अत्राहुः अर्थ
बोधजनकत्वस्य वाच्यवाचकपदनिष्ठस्य वाच्यवाचकभावव्यवहारनियामकशक्तित्वसंभवेपि न कार्य्यकारणभाव

यत्ते न शक्तिप्रयोज्यैवोपस्थितिरिति न लक्षणज्ञानकार्य्यकारणभावान्तरं समायातीति परास्तम् प्रयोज्य
त्वस्यानतिप्रसक्तस्य दुर्वचत्वादिति प्रपंचितं भूषणे ॥

कल्पनायां लाघवागौरवादिविचारचर्चामयस्य विचारासहः तथाहि शाब्दबोधं प्रति पदशक्तिज्ञानस्य हेतुतेति
निर्विवादं सा च भवदुक्तकार्य्यजनकत्वस्य शक्तित्वेन संभवति तद्रूपायास्तस्याः शाब्दधीजनकतायामनव
च्छेदकत्वात् तस्यापि स्वावच्छेदकत्वे घटं प्रत्यपि घटकारणत्वेन दंडस्य कारणतास्यादिति सर्वसिद्धान्तभंगः किं
च प्रयोज्यप्रयोजकव्यवहारदर्शनात् प्रयोज्यप्रवृत्त्यानुमिते तदीयघटानयनादिज्ञाने उपस्थितत्वाच्छब्दस्यैव हेतु
तायामवधारितायामसंबद्धस्याकारणत्वानुपपत्त्या कल्प्यमानस्य संबंधस्य जनकतारूपत्वासंभवः स्वयमुप

मू॰
सा॰ द॰
१६५
169

प्रयमानत्वेनागृहीतस्यागृहीतमप्रशाकत्वात् यदि चास्मात्पदादयमर्थो बोद्धव्य इदं पदमेतदर्थबोधं जनयत्वित्याद्या
कारके स्वरेच्छाविषयत्वस्यापि गंगापदजन्यत्वप्रकारतानिरूपितशाब्दबोधत्वावच्छिन्नोद्देश्यतानिरूपितविशेष्य
त्ववृत्त्यवच्छेदकतानिरूपिताधेयत्वसंबंधावच्छिन्नावच्छेदकतापर्याप्त्यधिकरणत्वस्य शक्तित्वाभ्युपगमे लक्षणो
च्छेदो नैयायिकमतेपि गंगायदा नीरबुद्धिर्भवत्वितीच्छायामगवतोपि संभवात् तादृशेच्छीयनिरूढत्वावच्छेदकता
पात्तीरेपि सत्त्वात् किंच निरूढेच्छाविषयत्वस्य शक्तित्वे प्रवाहविशेष्यकबोधे गंगापदजन्यत्वप्रकारतानि
रूपितशाब्दबुद्धित्वावच्छिन्नोद्देश्यतानिरूपितविशेष्यत्ववृत्त्यवच्छेदकतानिरूपिताधेयत्वसंबंधावच्छिन्ना
वच्छेदकत्वप्रकारकप्रवाहविशेष्यकनिर्णयत्वेन हेतुतायां कारणतावच्छेदकगौरवं च ननु शक्तिज्ञानस्य
शाब्दबोधे यद्यतिरिक्तकारणत्वं स्यात्तदेव कारणतावच्छेदकगौरवसंभावना तदेव न लक्षणप्रकार्यकारणभावेनै
वतिर्वाहात् तथाहि घटपदजन्यत्वप्रकारतानिरूपितशाब्दत्वावच्छिन्नोद्देश्यतानिरूपितविशेष्यत्ववृत्त्यव
च्छेदकतानिरूपिताधेयतासंबंधावच्छिन्नावच्छेदकत्वावद्घटवान् इति विशिष्टवैशिष्ट्यबोधे तादृशावच्छेदकतावा
न्घट इति बोधस्य विशेषणतावच्छेदकप्रकारकनिर्णयविधयाकारणता सर्वसंमता तत्र निर्णयत्वं यदि तादृ
शावच्छेदकत्वाभावाप्रकारकत्वे सति तादृशावच्छेदकत्वप्रकारकत्वं तदा तादृशावच्छेदकत्वाभाववान्घटस्तादृ

१६५

दृशावच्छेदकत्वं वा घट इत्यादिसमूहालंबनासंग्रहः नापि घटे तादृशावच्छेदकत्वाभावाप्रकारकत्वे सति तत्र ता
दृशावच्छेदकत्वप्रकारकत्वं समुच्चयासंग्रहप्रसंगात् नापि घटत्वावच्छेदेन तादृशावच्छेदकत्वाभावाप्रका
रकत्वे सति तत्र तादृशावच्छेदकत्वप्रकारकत्वं समानाधिकरण्येन तादृशावच्छेदकत्वाभावावगाहिसंशयसं
ग्रहापत्तेः अतो घटत्वावच्छेदेन तादृशाभावाप्रकारकत्वे सति घटत्वसामानाधिकरण्येन तादृशावच्छेदकत्व
प्रकारकत्वं सामानाधिकरण्येन निर्णयत्वं वक्तव्यं तदवच्छिन्नकारणतानिरूपितकार्य्यतावच्छेदकं च तत्सामा
नाधिकरण्येन तादृशावच्छेदकताविशिष्टवैशिष्ट्यावगाहित्वं तथा सति भाविज्ञानमप्रमेत्यप्रमाणग्रहानन्तरं
घटत्वसामानाधिकरण्येन तादृशावच्छेदकत्वाभाववान् घट इति ज्ञाने ततो घटत्वावच्छेदेन तादृशावच्छेदकत्वा
वगाहिनिर्णयस्य ततो घटत्वसामानाधिकरण्येन तादृशावच्छेदकत्वविशिष्टवैशिष्ट्यावगाहिबुद्धिसत्त्वे सामा
नाधिकरण्येन तादृशावच्छेदकत्वनिर्णयस्य व्यभिचारापत्तेः अतः सामानाधिकरण्येन तन्निर्णयविशिष्ट
वैशिष्ट्यावगाहिबुद्धित्वमेव तत्कार्य्यतावच्छेदकं वाच्यं अवच्छेदकावच्छेदेन तन्निर्णयस्यापि कारणे वैशि
ष्ट्यमेव कार्य्यतावच्छेदकं वाच्यं अन्यथोक्तस्थले यवज्जायमानायाः सामानाधिकरण्येन तादृशविशिष्टवैशि
ष्ट्यावगाहिबुद्धेरवच्छेदेन तन्निर्णयकार्य्यतावच्छेदकानाक्रान्तत्वप्रसंगात् तथा च तादृशावच्छेदकत्वा

मू० सा० द० १७०

170

यगाहिनिर्णयवैशिष्ट्याङ्केनित्वस्य शाब्दबोधे सत्वात्तातिरिक्तकार्यकारणभावइति कारणतावच्छेदकगौरवस्याच
म्रइतिचेन्न उक्तस्थले द्वितीयक्षणे सामानाधिकरण्येन तादृशावच्छेदकत्वविशिष्टवैशिष्ट्यावगाहिबोधानु
पगमेत्तत्तिविरहात् क्षणविलम्बे तावच्छेदकावच्छेदे तादृशावच्छेदकत्वावगाहिविशिष्टवैशिष्ट्यबो
यस्यैवोपगमाद्वैशिष्ट्यस्य कार्य्यतावच्छेदकत्वासम्भवादतिरिक्तकार्य्यकारणभावस्य शाब्दबोधेऽप्यावश्यक
त्वात्कारणतावच्छेदकगौरवं द्रष्टव्यमेव तीरनिष्ठावच्छेदकतया तादृशविशेष्यत्वहृन्नवच्छेदकतानिरू
पितत्वेपि न तस्यास्तादृशावच्छेदकतात्वेन तीरादिनिष्ठावच्छेदकतानिरूपितत्वमपि तु शुद्धावच्छेदक
तात्वेनैवेति न लक्षणोच्छेद इति तु स्वशिष्यप्रतारणमात्रं उक्तरीत्याबोधकत्वस्यैव बोधकताघटितेस्वरूपावि
षयत्वस्यापि दुर्ग्रहत्वात् ज्ञानादिविषयत्वमादाय विनिगमनाविरहाच्च न तस्य शक्तित्वमिति विभाव्यते तत्स्व
रूपपदपदार्थयोर्वाच्यवाचकभावव्यवहारनियामकः संबन्धः पदार्थान्तररूपः शक्तिः स्वतन्त्रएववाच्यत्वंप
दानसमवायितया वस्यत इति वदता दीधितिकारेणापि शक्तेः पदार्थान्तरत्वमेवाङ्गीकृतं तस्य च लक्षणा
हृत्तस्यैव धर्मिग्राहकमानसिद्धतया लक्षणेऽपि तयेलक्षणाङ्गीकारस्यावश्यकः एवं च तज्ज्ञानस्य हेतुताक
ल्पनप्रयुक्तगौरवं फलमुखत्वान्न दोषावहमन्यथानुपपत्तेश्च अथवा शक्तिलक्षणज्ञानयोरेकयव कार्यका

रणभावः तथाहि तद्घटत्वप्रतिशक्तित्वावच्छिन्नसांसर्गिकविषयतानिरूपितनत्पदनिष्ठप्रकारतानिरूपितनद
र्थनिष्ठविशेष्यताकज्ञानत्वेन कारणत्वं शक्तिसंबंधेन शक्यसंबंधेन वा पदप्रकारकेणाने शक्तेः संसर्गत्वात् श
क्तित्वनिष्ठावच्छेदकतायाः परेषामभिर्ननिवेशपत्ते तेन शक्यसंबंधेन पदप्रकारकज्ञानस्यापि क्रोडीकरणात् पर
न्तु पदप्रकारतानिरूपितनासांसर्गिकविषयतानार्थप्रकारतानिरूपितेन शक्तिसंबंधेन पदाभावप्रकारकबुद्धेश्च
निवर्त्यत्वेन लक्षणाज्ञानस्यैवं च मरणाख्यव्यवहारोपि स्वरसतः संगच्छते तस्मान्निरूढलक्षणायाश्च ग्राहकं व्याक
रणादि तदुक्तं शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च वाक्यस्य शेषाद्विवृत्तेर्वदन्ति सान्निध्य
तः सिद्धपदस्य वृद्धा इति अत्र शक्तिपदं निरूढलक्षणायाश्चाप्युपलक्षकमिति नैयायिकाः यत्तस्त्वमतेलः
कर्मणीत्यादिसूत्रेण लाघवमहत्कृते न कृतावेशाशिनेकत्वे रीतिः पूर्वमकृतं तथा गुणेप्युक्तादयः पुंसीत्यादिको
शेनापि लाघवाद्गुणे शक्तिः शुक्लादिपदानां गुणाश्रयेतु निरूढलक्षणा न शक्तिरनेकगुणानां शक्यतावच्छे
दकत्वे गौरवादेवमन्यत्रापि लक्षणायां निरूढत्वं च अनादित्वं तदपि स्वजन्यबोधसमानाकारपूर्वपूर्वबोधध्वं
ससमानकालिकत्वं उपमानस्य सादृश्यपादिज्ञानात्मकस्यातिदेशवाक्यार्थस्मृतिद्वारा गवयपादिर्गवयादिपदवा
च्यइत्याकारकशक्तिपरिच्छेदकत्वं आप्तवाक्यं वेदमेतद्वाचकमित्यादि तस्मात् आप्तस्य प्रकृतवाक्यार्थयथा
र्थज्ञानवान् व्यवहाराद्यथा केनचित्प्रयोजकवृद्धेन घटमानयेत्युक्ते प्रयोज्यवृद्धेन घटे आनीते पार्श्वस्थो बालो

मू॰
सा॰द॰
९२
171

घटानयनरूपं कार्य्यं घटकर्मकानयनसाध्यं व्यवहारे व्यवहर्त्तृज्ञानस्य प्रयोजकत्वादित्यनुमिमीते अनंतरं त
द्धेतुजिज्ञासायां तद्धेतुत्वेनोपस्थिते शब्दमेवावधारयति तस्य चार्थासंबद्धस्य तज्जनकत्वानुपपत्त्यार्थेन साकं
पदसंबंधं शक्त्याख्यं निश्चिनुते यद्यपि प्रथमं वाक्यस्य वाक्यार्थे सोवधारितस्तथापि घटं नय गामानयेत्या
द्यावापोद्वापाभ्यां प्रत्येकपदे शक्तिग्रहे तेन सहस्रदायेत्तद्धहस्याप्रामाण्यमवधार्य्यत इति नैयायिकाः प्रत्येक
पदशक्तेर्बोधयत्वेरिति तदाशयः अन्येन्तु वाक्यार्थे निरूपिता शक्तिर्वर्त्तनपदे त्वाहुः। यत्तु समासवादे वि
शेषितं वाक्यशेषात्तु यवैर्जुहोतीत्यादौ यवपदस्य दीर्घशूकविशिष्टे आर्याणां प्रयोगात् कंगौ म्लेच्छानां प्रयोगात्तु श
क्तिरिति संदेहे यत्रान्या ओषधयो म्लायंते अथैते मोदमाना इवोत्तिष्ठंतीति वाक्यशेषेण दीर्घशूकविशिष्टे शक्तौ
निर्णीतायां कंगौ पदवनां शक्तिभ्रमात् प्रयोग इति निर्धार्य्यते विवरणस्य यथा शक्तिग्राहकत्वं तथापात्वर्थेति
रूपेणउक्तं प्रसिद्धपदसमभिव्याहारस्यापि क्वचित् शक्तिपरिच्छेदकत्वं यथा सहकारतरो मधुरं पिको
रौतीत्यादौ प्रसिद्ध सहकारादिपदसान्निध्येन पिकादिपदानां शक्तिः कोकिलादौ निर्णीयते सैषा शक्तिर्नाना
र्थेषु संयोगादिना नियम्यते तदुक्तं संयोगो विप्रयोगश्च साहचर्य्यं विरोधिता अर्थः करणं लिंगं शब्दस्यान्य
स्य सन्निधिः सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतव इति शब्दार्थस्यानवच्छे
दे संदेहे सति तन्निरासद्वारा विशेषस्मृतेर्निर्णयस्य जनकाः संयोगादय इत्यर्थः उपस्थितानामनेकेषामेकतरस्मा ९२

त्रार्थनानार्थनिर्णयद्वारा नानार्थविषयकबोधजनका इति भावः सवत्सा धेनुरवत्सा धेनुरिति क्रमेण संयोग

विप्रयोगोदाहरणे रामलक्ष्मणावित्यादौ साहचर्य्येणोभयोर्युगपदेव नियमनमिति नान्योन्याश्रयः साहचर्य्यं

च सादृश्यस्य दृश्ययोरेव सहप्रयोगनियमात् रामार्जुनगतिस्तयोरित्यत्र विरोधेन शक्तिनियमनं अंजलिना

जुहोतीत्यंजलिना सूर्य्यमुपतिष्ठत इत्यादौ जुहोत्याद्यर्थवशादंजलिपदस्य तत्तदाकाराञ्जलिपरत्वं सैंधवमानये

त्यादौ तु प्रकरणेन तन्निर्णयः अक्ताः शर्करा उपदधातीत्यादौ तेजो वै घृतमिति घृतस्तुतिरूपात् लिंगादक्ताशब्द

स्य घृतसाधनाञ्जनपरत्वं रामो जामदग्न्य इत्यादौ जामदग्न्यपदसन्निधानेन परशुरामः अभिरूपाय कन्या देयेत्या

दावभिरूपतरायेति सामर्थ्यादवगम्यते पश्यतिं च परशुनेत्यादावौचित्यात् परशुपदस्य छेदनार्थत्वं भात्यत्र

परमेश्वर इत्यत्र राजधानीरूपादेशात्परमेश्वरपदस्य राजार्थबोधकत्वं चित्रभानुर्भातीत्यादौ चित्रभानुपदं रात्रौ

वह्नेर्बोधकं दिवा सूर्य्यस्य मित्रे भातीत्यत्र व्यक्तेर्लिंगादपि सहृदेते सूर्य्यप्रतीतिः स्थूलपृषतीमनड्वाहीमित्यत्र

स्वरात्तत्पुरुषबहुव्रीह्यर्थनिर्णयः आदिना सत्वमनवरणत्वादि लसिक्तमित्यत्र हृजार्थकः कर्मप्रवचनीयः सवि

क्रमित्यत्रोपसर्गोन्यार्थः प्रणायक इत्यादौ प्रणयनकर्तृबोधो णत्वात् प्रनायक इत्यादौ प्रगतनायकदेशस्य तदभा

वादिति इंद्रियाणां स्वविषयेष्वित्यादौ हरिवाकस्यान्वयमर्थः इंद्रियाणि यथा चान्तःविषयेषु घटादिषु अनादिः पु

मू॰
सा॰ द॰
१७२
172

उत्कटप्रयत्नानपेक्षतायोग्यतातदीयावात्त्वप्रकारतावच्छेदकधर्मवत्स्वरूपालितयार्थैः साकं पदानामपि संबंधएवयोग्य
तातत्स्वाद्वोधजनकत्वावच्छेदकधर्मोऽनुवोधजनकत्वमेवेतिनतद्विरोधः पदपदार्थयोर्यः सशाक्तेयः प्रा
द्वः सोऽर्थं इतिनीतरेतरात्म्यासमूलं तादात्म्यं भेदव्याप्तकमस्ति अतएवतस्यवाचकःप्रणवः ओमित्येकाक्षरं
ब्रह्मेत्यादौपतदर्थयोरुभयोर्भेदाभेदयोरुक्तत्वाविवक्षयाषष्ठीप्रथमाभ्यामुल्लेखः सएवसंबंधःशक्ति
रितिसंकेतःपदार्थांतरवेतिभट्टमतंतन्नसम्यक् भेदाभेदयोरुभयोःपरस्पराभावरूपतयाविरुद्धत्वेनतत्
योरेकत्रावस्थानासंभवात् घटपदनाशेपिघटस्योपलभ्यमानत्वान्नयोस्तादात्म्यस्यात्यंतमसंभावितत्वाच्चनचया
करके पाकश्यामेपि पाकोत्तरमिदानीं नश्याम इतिप्रतीतेर्भेदो न विरुद्धाविति वाच्यं अन्यथाप्यवृत्तीनां तेषामेकाव
च्छेदेनविरोधानयायात् अतएवतत्रदेशकालाद्यवच्छेदकभेदे नैवभेदप्रतीतिरिति घटोयं नश्यामोहतोनक
पिसंयोगीति पाकप्राक्क्षणावच्छेदेन श्यामतादात्म्यापलोघटः पाकोत्तरक्षणावच्छेदेन श्यामभिन्नरस्यावच्छेदकभेदादेवयकस्मि
न्भेदाभेदयोःप्रतीतिरितित्ववच्छेदकाभेदप्रतीतिः किंचिदानानीमयंनश्यामोमूलेनायंकपिसंयोगीत्येवनह्यात्रनतथा अस्मिन्नर्थेयंश
ब्द इतिभेदप्रतीतिसमकालिकोमित्येकाक्षरंब्रह्मेतिप्रतीनावच्छेदकाभानात् किंत्वभेदवादे घटपदनाशे घटनाशाप
त्तिरेवंशब्दवदर्थस्यापिश्रोत्रेंद्रियग्राह्यतायाघटवच्छटशब्दादेःश्रोत्रेंद्रियाग्राह्यतायाश्चापत्तिरितिवज्रव्याकोपः
नचात्यंतभेदेघटः पटइत्यस्यतनाभेदेघटोघटइतिसामानाधिकरण्यदर्शनाद्भेदाभेदवादोपपत्तिरितिवाच्यंश १७२

ह्ये घट इत्याद्यननुभवाच्च घटो न घटो न शब्द इत्याद्यननुभवाच्चाभेदस्यैवासिद्धेः ॐमित्येकाक्षरमित्यादौ त्वक्षरपदस्य
स्य तत्प्रतिपाद्ये निरूढलक्षणया सामानाधिकरण्योपपत्तिरिति तत्प्रतिपादितादात्म्यसाधिकात्तस्मान्नादात्म्य
शक्तिवादपक्षस्त्याय्यात मनोरमप्येवेत्याधिकमन्यत्रोपपाद्यं ॥ सा च शक्तिस्त्रिधा रूढिर्योगो योगरूढिश्चे
ति अवयवार्थाप्रतीतौ या समुदायनिरूपिता अर्थबोधिकानन्यदनिरूपिता सा तदर्थे रूढिर्यथा मणिनूपुरा
दौ प्रत्येकप्रकृतिप्रत्ययनिरूपिता तत्तदर्थे या शक्तिः सा योगशक्तिः यथा पाचकपदघटकधात्वर्थप्रत्यययोः
पाके तत्कर्तरि च अश्वगंधादिपदात्तु कदाचित्समुदायनिरूपितौषधिविशेषरूढिशक्त्यौषधिबोधः कदाचि
दश्वगंधोयस्यामिति व्युत्पत्त्या वाजिशालादिबोधोऽवयवशक्त्येति कदाचित्तस्य यौगिकत्वं कदाचिद्रू
ढत्वमिति तस्य पृथग्रूढियोगापहारिणीति न प्रकारान्तरभावे लाक्षणिकेन तदा निशालीबोधश्च य
दे पत्रावयवार्थशक्तिसहकृता समुदायशक्तिरर्थबोधिका सा योगरूढिरित्युच्यते यथा पंकजादिपदे तत्र
पंकाधिकरणकोत्पत्त्याश्रयपद्मबोधात् पद्मस्यानुपपत्तिप्रतिसंधानादिकं विना बोधान्न लक्षणावसर इ
त्यादि प्रपंचितं पूर्वमेव गंगायां घोष इत्यादौ तु गंगापदस्य तीरे शक्यसंबंधरूपलक्षणाग्रहे तदाहितसंस्कारज
न्यतीरस्मृत्या तीराधिकरणकघोषशाब्दबुद्धिः न च लक्षणाव्यवहारान्यथानुपपत्त्या शक्त्यतिरिक्ता या लक्षणा स्याश्रव
णमस्ते यत्वात् अन्वयानुपपत्तिप्रतिसंधानं च तद्बीजं यथोक्तं कविभिराकांक्षतमपि यथा वदन्तेतस्यावदर

भू॰
सा॰ द॰
१२३

123

नेमूखममखेभातिचाव्यासाभित्यत्रतादात्म्यसंबंधावच्छिन्नवदनत्वावच्छिन्नप्रकारतानिरूपितवदनत्वावच्छिन्न
विशेष्यताकबोधोनसंभवति अभेदसंबंधावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबंधेनशा
ब्दबुद्धौविषयतावच्छेदकभेदस्यनेत्रत्वादितिवदनार्थकवदनपदनिरूपिताकांक्षानवदनपदेतत्रवदनप
दमाह्लादकलक्षकं नतूपस्थिताह्लादकस्याभेदान्वयोवदनइति अनुशासनबोधितैतिराकांक्षत्वमपिक्वचि
त्रहीजं यथाकृत्स्नसीतापरित्यागः सरत्नाकरमेखलांबुभुजेपृथिवीपालः पृथिवीमेवकेवलामित्यत्र
भुजिधातोरवनवाचकस्यात्मनेपदनिराकांक्षनयावाच्यार्थंबुद्धौप्रतिबद्धायांभुजिनास्वार्थेपालनसंबंधिर
शासनेलक्ष्यते आत्मनेपदसमभिव्याहृतभुजिनावच्छेदेनाख्यातोपात्तकर्तृत्वेनपालनवृत्तित्वरूपा
योग्यत्वरूपनैराकांक्षस्यभुजोनवनइतिसूत्रेणप्रतिपादनात् तत्रकेवलपदेनतत्कालिकरामाभिन्नपृ
थिवीपालकर्तृकभोगकर्मनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकैकत्वयोगिव्यक्तिरभिधीयते एवंप्र
कारेणचपृथिव्यन्ययोगव्यवच्छेदः एवंचतत्कालिकरामाभिन्नपृथिवीपालकर्तृकभोगकर्मनिष्ठान्योन्या
भावप्रतियोगितानवच्छेदकैकत्वविशिष्टाभिन्नपृथिवीकर्मकभोगकर्त्ता पृथिव्यन्यस्त्रीकर्मकभोगकर्त्तार
माभिन्नः पृथिवीपालइतिवाक्यार्थबोधः क्वचिच्च मानांतरलभ्यत्वेप्रतिबंधिकायाः सिद्धेः सत्वा
दनाकांक्षत्वं यथारामोस्मिसर्वंसहइत्यादौरामत्वस्यसर्वंसहत्वानुपपादकत्वाद्रामपदस्यराज्यभ्रंशपित्र १२३

रणप्रवासदारक्षसनडुःखानुभवितारिलक्षणा प्रत्ययवरामोस्मीतिवाक्यार्थः सर्वसहत्वेहेतुः तथाच तात्पशाद्दुःखानुभ
विता सर्वसहत्वनाश्रयत्वइतिबोधः द्विरेफोमधुरंरौति द्विकः कूजतिकाननइत्यादौतुमुख्यार्थबाधएवलक्षणाबीजं
तथाहि येन पुरुषेण द्विरेफादिपदस्य प्राणिविशेषे शक्तिर्नगृहीता गृहीता वा द्विरेफो यत्रेति व्युत्पत्त्या यद
विशेषे सा लक्षणा वाचस्य प्राणिविशेषस्य कमधुरारावकर्तृत्वशाब्दबोधस्य तात्पर्यविषयत्वानुपपत्त्या द्विरे
फपदेन रेफद्वयघटितपदवाच्यत्वरूपलक्षणयोपस्थिते प्राणिविशेषे मधुरारावकर्तृत्वान्वयः प्रत्ययवतस्त्र
लक्षितेन लक्षणेति व्यवहारः स्वघटकरेफद्वयलक्षितेन भ्रमरपदवाच्यत्वरूपवान्तस्याः द्विरेफपदेन लक्षणया भ्रम
रपदमुपस्थाप्यते तेन च प्राणिविशेषोपस्थितिरिति न सम्यक् प्रत्ययानामिति व्युत्पत्तेस्तत्र प्रत्ययार्थान्वयासं
भवात् भ्रमरपदजन्यमधुकरोपस्थितौ द्विरेफपदरूपप्रकृतिजन्यत्वाभावात् भ्रमरपदे लक्षणाया
मपि तत्तेन तदुपस्थितिरुक्तरीतिसैवार्थप्रत्यायकत्वादिति न कश्चित् एवं द्विकः कूजति कानने इत्यादावपि
बोध्यं एवं गंगायां हरति वैयाघ्रं च स्नापीनावगाहितेत्यत्र गंगापदवाच्यप्रवाहस्य पानकर्मत्वासंभवादतो गंगा
पदेन शक्त्या प्रवाहः स्मर्यते तेनावयवावयविभावरूपसंबंधग्रहाहितसंस्कारसहकृतेनोद्बुद्धं तज्जलस्मरणं
तेन तस्य पानकर्मत्वान्वयबोधः तात्पर्यानुपपत्तिरेव वा सर्वत्र लक्षणाबीजं तदुक्तापकत्वेनैव नैरर्थक्याद्यादीना
मुपयोगः प्रत्ययवक्षष्टीः प्रवेशयेत्यादौ यष्टिप्रभृतिपदानां यष्टिधरे लक्षणा यष्टिभिः प्रवेशनकर्मत्वान्वयावा

मू॰
सा॰ द॰
१७५

175

योऽपि भोजनादिप्रकरणोक्तौ तात्पर्यविषयभोजनानादिप्रयोजनकप्रवेशनकर्मत्वस्य तत्रानुपपन्नत्वात् एवं
कुन्ताः प्रविशन्तीत्युक्तिर्विशेषणीयान्तीत्यादावप्यस्ति ननु छत्रिविशिष्टस्य पदद्वयवृत्तेर्न वाक्यतया कथं तस्य लक्षणास्वशक्या
प्रसिद्धेः किंच नात्रैकसार्थवाहित्वं लक्षणावच्छेदकं यान्तीत्यस्यानन्वयापत्तेः गन्तृत्वेनोपस्थितस्य गमनाकांक्षाविर
हादिति चेत् सत्यं संबंधित्वेन शक्यमतः प्रत्ययेष्वेकसार्थसंबंधित्वेन लक्षणा छत्रपदे तात्पर्यग्राहकमित्यभ्युपगमादु
क्तदोषाप्रसंगादिति ननु स्वायत्ते शब्दप्रयोगे किंमित्यनवच्छिन्नाभिधानं प्रयोजनं तिशसायोपावनत्वादिप्रतिपत्त्यपेनादि
तरिहेत त्रहत्त्रिविनातत्प्रतीतेरप्यसंभवाद्व्यंजनापि तत्तोपाहृत्तिरवश्यमंगीकरणीया अतएवावलानोऽत्रियं हत्वावारिवा
हैः सहानिशं तिष्ठेति च पलायत्त्र सकाले समुपागत इत्यत्राशक्तानोऽत्रियमपहृत्य पुंश्चलो जलवाहकैः समं रमं
त इत्यतात्पर्यविषयरूपयथीनालिंगितस्याप्यर्थान्तरस्य प्रतीतिः साचार्यद्वारिकापि भ्रम धार्मिक विस्रब्धं सोऽद्य श्वा
मारितस्तेन गोदातीरनिकुंजप्रतिष्ठितनिसर्गदृप्तसिंहेनेत्यादौ प्रतिभाजुषां सहृदयानां वक्तृबोध्यबोद्धृवैशिष्ट्यस्य सहू
त्रौ सिंहप्रतीत्या तेन रेखभीरुभ्रमणयोग्यत्वस्य गोदावरीतीरे प्रत्यपादितिचेन्न रूढ्या नालिंगितार्थस्य केवलयोगेन प्रती
त्यसंभवेऽपि लक्षणया तस्याः सूपपादत्वात् पावनत्वादिप्रतीतिर्विशिष्टलक्षणयापि शुद्धलक्षणमेवानुपपत्तिपरिहारे
तविशिष्टे सेतितन यष्टीः प्रवेशयेत्यादावगतेः लिंगजस्य लैंगिकबुद्ध्यापि वाच्यार्थवैयंजनिकबुद्धेर्गतार्थत्वात् वस्तुतस्तु

गालिप्रदानादेरिवेतो न ख्यातात्पर्य्यमवगम्यते न तत्त्वपर्वोपोनमिति वाँवाये व्यभिचारपत्तयर्मनयो संदेहे वा तेभ
वान्नत्रैयालंकारिकैर्यजनोल्लासाभ्युपगमात् अतएव विहत्मानशाजहंसेत्यादाह्निष्टपरंपरितरूपकस्थलेम
ख्येहंसस्यैवाहार्य्याभेदान्वयः शाह्लोवन्क्रमविना सरटशलक्षणयान्नसाटश्यत्त्वैयोसाधारणधर्मज्ञानेनासिंस्व
मानस्यवासित्वग्रहेनैकार्थोपस्थितिरूपः श्लेषस्तत्रानेकार्थतात्पर्य्यज्ञानेनतत्रराजहंसस्साटश्यधीरित्यन्योन्याश्र
यइतिकेचिन्तत्प्रलपितममास्तम यदिपुनराननुभाविकोलोकानांस्वरसवाहीशाब्दमर्मन्थंप्रत्येमीतिप्रमायल
दावैयंजनिकीवुद्धिर्गीर्वाणगुरूणामप्यशक्यवारणेतिव्यंजनाहृत्तिसिद्धिरयमन्यूहैवं लाक्षणिकपदेनानुभाव
कमितिसंप्रदायः स्वशक्यानुभवं प्रत्येवयदानोकारणत्वेइतरपदार्थेनसहस्वशक्यानुभावकत्वेनल्क्षमाहोमव्यप
दादेवतीरानुभवादशक्यादशकोपस्थितिर्लक्षणेत्यभ्युपगच्छतोमतेसजन्योपस्थितिसंबंधेनैवपदस्यानुभा
वकतथातस्याप्यत्तीरेऽभावान्नस्यानुभावकत्वमितिनिन्मूले नचतन्नसंभवतेशक्योपस्थिततीरादेरयकृत्य
र्थेनयातत्रप्रमयार्थोन्वयासंभवात् वृत्तन्तलाक्षणिकपदमदेशपविधेयभावेनानुभवाजनकमित्येवनदर्थः उ
देश्यविधेयभावेनान्वयेशक्तिमत्वस्यैवप्रयोजकत्वात् अतएवलत्त्यार्थस्यविधेयतयाऽभानान्नविधीयपरःशाह्
र्थइतिसंगच्छते किंचतेनसंयोगस्यपटसंयोगहेतुत्वतात्पर्यकेत्वंतः पटंकरोतीतिसर्वलाक्षणिकेऽन्वयानुभवो
पलायापत्तेर्लाक्षणिकंपदमननुभावकमेवेतिताटश्यवादस्याकिंचित्करत्वमित्याद्यन्यतोवधार्य्यमित्युक्तंविस्तरेण

भू॰
सा॰ द॰
१२५
175

स्वोक्तनिकृष्टमतमवलंब्यमूलमवतारयति नन्वेवमिति एवं बोधकत्वस्यैव शक्तित्वे तत्रापि अपभ्रंशरूपभाषा
यामपि स्यादिति शक्तिः पदार्थान्तरमिति मतेन तद्वाहन्तु तस्यापि वक्तुं शक्यत्वादिति भावः इष्टापत्तावाह तथा चेति
नापभ्रंशितवैतत्स्वोक्तितं वैरतिनिषेधविध्याविषयत्वापत्तेः इष्टापत्तेर्वक्तुमशक्यत्वादिति भावः हीयेति अपभ्रंशानां
बोधकतारूपशक्तिमत्त्वाभावप्रतिपादनेन साधुत्वस्याव्यवस्थानिर्वचनेन चेत्यर्थः अनुमानेनेति अनुमानम

नन्वेवं भाषादिनो बोधदर्शनाद्बोधकतारूपाशक्तिस्तत्रापि स्यात्तथा च साधुतापि स्यात् शक्तत्वस्यैव साधुता
या व्याकरणाधिकरणे प्रतिपादनादित्याशंक्य हि पा समाधत्ते असाधुरनुमानेन वाचकः कैश्चिदिष्यते वाच
कत्वाविशेषेपि नियमः पुण्यपापयोः असाधुः गाव्यादिः अनुमानेन साधुशब्दमनुमाय वाचको बोधकः कै
श्चिदिष्यते तथा च लिपिवत्तेषां साधुस्मरणप्रबोधप्रयोगे न तु साक्षाद्वाचकत्वमिति न साधुत्वमिति भावः उक्त
हि वाक्यपदीये साधुत्वमानेन ॥

मुतेः गाव्यादीनामपभ्रंशानां गवादिपदविर
त्र स्मृतिरनपख्यानामात्रेहानमिति
हतित्वेन तु ततः प्रकृतिस्मरणसंभवात् अनयव वत्यन्तितेषां साधुस्मरणप्रबोधप्रयोग इति अनुमायेति स्वखेत्यर्थः सा
त्वादपभ्रंशानां बोधकत्वं तु तयनत्कल्पेः साधुत्वज्ञानस्य प्रतिबन्धकत्वादिति भावः तत्र हरिसंमतिमाह उक्तं हीति ते
अपभ्रंशाः अनुमानेनेत्यादिन्यादि असाधोः साधुप्रकृतिकतया तत्साधुप्रकृतिकतया तत्सादृश्येन साधुष्ठित्यसस्म

॥ १२५

प्रत्याययन्ति गवादयोऽर्थबोधकारणानीत्यर्थः तथा च साधुशब्दस्य तावेवासाधूनामप्रयोगो न तु तेषां सांतत्याद्बोधकत्व
मिति न शक्यत्वरूपं साधुत्वं तेषामिति भावः पक्षान्तरमाह तादात्म्यमिति साधुगवादिशब्दतादात्म्यप्रकारकत्वा
न्नविषयतामापद्यैवेत्यर्थः गोपदे ऽज्ञारणीये केनचित्कारणाद्यदि वेन गावीत्युच्चारिते न किन्तु गोपदमेवेदमिति
तत्तादात्म्येनभासमानागावादिशब्दा एव गवादिरूपार्थस्य प्रकाशकास्त्वार्वेऽत्यर्थः एवकारेण तत्त्वेन बोधकत्व
व्यवच्छेदस्तादात्म्यागतिष्ठात्रभ्रमरूपाभिप्रायानपूर्वीकत्वेन वास्तवतादात्म्याभावात् यत्तु शब्दार्थयोस्तादा

त्म्यमयोत्पत्तिहेतवः तदात्म्यमुपगम्यैव शब्दार्थस्य प्रकाशकाः न विशिष्टैरनुगम्यन्ते पर्यायाइव
साधवः ते यतः स्मृतिमात्रेण तस्मात्सात्तादवाचकाः ॥

त्म्यं शक्तिरिति मतावष्टम्भेन तादात्म्यमुपगम्यैवेत्यस्यावतारणं तन्मयेव तादात्म्यस्य शक्तित्वेपि शब्दनिष्ठशा
ब्दनिष्ठतादात्म्यत्तानस्यार्थबोधाजनकत्वात् किन्त्वपभ्रंशानां साधुशब्दतादात्म्यभ्रान्त्यार्थधीजनकत्वमि
ति पक्षान्तरमप्यत्रयानुपपादनस्यैव सम्यक्त्वमिति विभावनीयं अवाचकत्वे हेतवः न शिष्टैरिति यतस्तेऽसा
धवः पर्यायाइव शिष्टैः स्मृतिशास्त्रेणानुशासने न नानुगम्यन्ते न प्रतिपाद्यन्ते ऽतो वाचका इत्यर्थः अन्यथा
साधवः पर्यायाइवापभ्रंशा अपि शास्त्रेण प्रतिपाद्येरन्निति भावः ॥

मू॰
सा॰ द॰
१७९

176

तेसाधुष्वनुमानेनेत्यर्द्धेनोक्तमर्थं विशदयति वृद्धेवेत्यादिना तदुत्तरमेवास्य पाठस्सूचितः अवधकमितिभावः एणक्रियाविशेष
णे तद्विदां साधुविदां तेन अपभ्रंशेन साधौ व्यक्ते स्मृतेहतिनिर्णयः शाब्दबोधो भवतीत्यर्थः एवं साधुशब्दस्येव बोधकत्वे सा
धुव्यवहितः साधुस्मृतिद्वारकः अभिधीयते बोध्यत इत्यर्थः उक्तमेवार्थं द्रढयितुमाशङ्कते नन्विति तेषामिति साधु
पर्यायाणां एकत्वात् एकजातीयत्वादित्यर्थः तथाचैकजातीयत्वप्रयुक्तशक्तिकल्पना अस्य स्थाने तत्र देशभिन्नेष्वप
वृद्धेवेति यदा बालः शिक्ष्यमाणः अम्बाम्बेति अवधकं तद्विदां तेषां व्यक्तं भवति निर्णयः एवं साधौ प्रयोक्तव्ये योय
पभ्रंशः प्रयुज्यते तेन साधुव्यवहितः कश्चिदर्थोऽभिधीयत इति ननु अपभ्रंशानामवाचकत्वे किं मानं शक्तिकल्प
कस्य व्यवहारादेस्तुल्यत्वादिति चेत्तत्र तत्तद्देशभेदेन भिन्नेष्वनन्तेषु तेषु शक्तिकल्पने गौरवात् न च पर्याय
तुल्यताशङ्का तेषां सर्वदेशैकत्वाद्विनिगमनाविरहे न शक्तिकल्पना तथा अपभ्रंशेन तथा अन्यथा भा
षाशब्दानामपि पर्यायतया गणनापत्तेः एवं च शक्तमेव साधुत्वमिति नैयायिकमीमांसकानां मतं तदेत
न्मतेनैव दृष्टम् इदानीं स्वमतमाह वाचकत्वाविशेषेपीति अयं भावः अपभ्रंशानामशक्तत्वे ततो बोधः एव त
दपभ्रंशेषु शक्तिकल्पनमित्यर्थः शक्तिमत्त्वाविशेषात् नाभ्रष्टानामिव भाषाशब्दानामपि कोशादौ पर्यायेष्वप्रतिपादनेऽसा
दिति भावः अपभ्रंशाद्यपरेक्षोक्तरीत्या साधुपयादिनत्वात्र शक्तिस्वीकारः साभिनिवेशमात्रप्रयुक्तः इत्याशङ्कां नि
राचिकीर्षुरुक्तप्रकारसंभवं दर्शयति अयं भाव इत्यादिना ॥

१७९

3

नानिति साक्षन्निस्पर्थः तथाचानेषांसाधुशब्दानन्नभवेन तत्स्मरणेन तत्र शाब्दबुद्धिरुपपादयितुमशक्येति भावः न
नु स्मृतिकल्पनासंभवेप्यसाधौ साधुतादात्म्यभ्रान्त्यासास्तूपपादेत्यत आह तेषामसाधोरबोधाच्चेति विशिष्टबुद्धौ विशे
षणज्ञानस्य हेतुतयासाधोरज्ञाने तादात्म्यसंबंधेन साधुभ्रान्तिरप्यसंभवतु किंकेनक्रमकारस्यासंभवादपभ्रंशस्यापिवा
चकतावश्यकीति भावः शक्तिभ्रमादिति स्वार्थेतिरूपितायाः साधुशब्दनिष्ठायाः शक्तेरपभ्रंशेभ्रमादित्यर्थः किंबोधकत्व

तानविदुषामपियां मन्वते बोधात् तेषांसाधोरबोधाच्च शक्तिभ्रमात्तेभ्यो बोधइत्यपितबोधकत्वस्याबाधेन तत्त्वस्य
स्याभ्रमत्वात् ईश्वरेच्छाशक्तिरिति मतेपि सन्मात्रविषयिण्यास्तस्याअबाधात् शक्तेःपदपदार्थयोरितायाः ॥

रूपशक्तिभ्रमात्तत्र बोधउपपाद्यते किंचेश्वरेच्छारूपशक्तिभ्रमात्तत्र नाद्यः यत्तस्माह बोधकत्वस्येति द्वितीयेत्वाह ई
श्वरेच्छेति सन्मात्रेत्यत्रमात्रपदेकृत्स्नार्थकं अपभ्रंशाज्जायमानबोधस्य सर्वांशभवत्वेनतयाबोधजनकत्वस्यबाल्लवि
कस्यतत्रसत्त्वेनबोधकत्वेनेच्छायास्तत्रसंभवात्तत्रभ्रमत्वप्रतीतेर्भ्रमत्वेविषयबाधस्यैवतंत्रत्वादितिभावः ननुलात्त
णिकव्यावृत्तस्यबोधकत्वेनिच्छावत्त्वस्यापभ्रंशेऽभावाद्भ्रमत्वंस्तूपपादमतआह शक्तेरिति ॥

भू॰
सा॰ द॰
(७७)
177

असमासंभवाच्चेति तत्पदविशेष्यकतत्तदर्थबोधजनकत्वप्रकारकेच्छायास्तत्पदविशेष्यकत्वेन ग्रहीतायाश्चान्यपदविशे
ष्यकत्वासंभवेन भ्रमत्वासंभवादित्यर्थः इदं चेच्छाशक्तिरिति पक्षाश्रुतिप्रायेणेति रुक्तेर्बाविभ्यपदविशेष्यकत्वासंभ
वेन भ्रमत्वासंभवादित्यर्थः इदं चेच्छाशक्तित्वाभिप्रायेणेति रुक्तेर्बा विशेष्यत्वरूपायाः लाक्षणिकत्वापभ्रंशेष्वनभ्यु
पगमेन तत्स्यात्तत्र भ्रमेवाधकाभावादिति तथा च तत्र शक्तिभ्रमेण बोधस्योपपादयितुमशक्यतया बोधानुपप
त्त्याभावायामपि शक्तिरावश्यकीति भावः पारंपर्यादित्यस्यार्थं ब्रूते विगुणेष्विति हेतुगर्भविगुणेषु करणपाटवरू

असमासंभवाच्चेति उक्तं च वाक्यपदीये पारंपर्यादपभ्रंशा विगुणेष्वभिधातृषु प्रसिद्धिमागता येषु तेषां
साधुरवाचकः दैवी वाग्व्यवकीर्णेयमशक्तैरभिधातृभिः अनित्यदर्शिनां त्वस्मिन्वादे बुद्धिविपर्यय इति अ
वाचकः अबोधकः बुद्धिविपर्ययः पतयव वाचकानान्व इति विपर्यय इत्यर्थः ॥

पे अभिधातृवैगुण्यस्यापभ्रंशतियामकत्वात् दैवीति संस्कृतरूपेत्यर्थः व्यवकीर्णेति उच्छिन्नानहम्बीकाकृतेत्य
र्थः अनित्यदर्शिनो शब्दानित्यत्ववादिनो नैयायिकानामिति यावत् वादे वाचकताविचार इत्यर्थः ननु तेषां साधुर
वाचकत्वमसंगतं यस्मिन्नर्थे अपभ्रंशाः प्रयुज्यन्ते तस्य साधुवाच्यत्वस्य सर्वसंमतत्वादत आह अबोधक इति अ
वच्छिन्नः साधुर्नबोधक इत्यर्थः साधुस्मरणमत्र बोध इति न किंत्वपभ्रंशा एव तत्र साक्षाद्वाचका इत्यर्थः ॥ (७७)

अतएव दैवी वाग्व्यवकीर्णेयमित्यस्य संगतिस्तस्य साधुतादात्म्यारोपेणापभ्रंशानां बोधकत्वोपपादनपरत्वात्तथा च कथ-
मपभ्रंशानां वाचकत्वमत आह किंचेति वितिगमनाविरहादिति बोधकत्वाविशेषात्साधुतादात्म्यारोपं विनापि
तत्तो बोधस्यानुभवसिद्धत्वाच्चेत्यर्थः नाखिलभाषाणां दोष इति शक्तिवाचक इत्यर्थः ननु सकलदेशशिष्टपरि-
गृहीतत्वमेव विनिगमकमत आह किंचेति अवच्छेकमत आह किंचेति अवच्छेदिकेति जनकतावच्छेदिकेत्यर्थः

किंच विनिगमनाविरहादपि भाषायां शक्तिः न च तासां नानात्वं दोषः संस्कृतवन्महाराष्ट्रभाषायाः सर्वत्रै-
कत्वेन प्रत्येकं विनिगमनाविरहतादवस्थ्यात् किंचानुपूर्व्येवावच्छेदिका सा च पर्यायेष्वपि भाषाया-
मप्यानुपम्यैवेति कस्तयोर्विशेष इति विभाव्यं सूरिभिः ॥

कस्तयोरिति साध्वपभ्रंशयोरित्यर्थः सकलदेशशिष्टपरिगृहीतत्वं तु न विनिगमकं तथा सति शव-
तिर्गतिकर्मा कंबोजेषु प्रयुज्यते विकारमेवैनमार्य्या भाषन्त इति भाष्योक्तरीत्या तत्तद्देशनियतसंस्कृतेषु
शक्तिसिद्धिर्नापत्तेः वाचकस्यैव जनकतायामासकारिकाणां प्राकृतभावोदाहरणस्यासंगतत्वापत्ते-
श्च अतएव तत्तद्देशीयशिष्टानां तत्तद्भाषासत्तिः संदिग्धशक्तत्वप्रत्ययः न चासौ भ्रमः बाधकाभावादि-

उपसंहरति तथा चेति एवं अपभ्रंशानामपि शक्तत्वे साधुतास्यादिति साधुत्वव्यवहारापत्तिरित्यर्थः साधुभिर्भाषि
तव्यमिति साधुनैव प्रयुञ्जीतेति विधिरित्यर्थः नासाधुभिरिति नापभ्रंशितवै नम्लेच्छितवै इत्यादिनिषेधविधिरित्य
र्थः जनकतावच्छेदिका जातिः तत्र प्रमाणं त्वेकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवतीत्येकः पूर्व
पदयोरिति सूत्रस्थभाष्यपठितश्रुतिः सम्यग्ज्ञातः साधुत्वेन ज्ञातः यदिह परिनिष्ठितं तत्साधुरित्यर्थापत्तिलभ्य

तथा च संस्कृतत्वव्यञ्जकाभावाच्छब्दाः शक्ता एव न च पर्यायतया भाषाणां गणनानापत्तिः साधूनामेव कोशादौ वि
भागाभिधानात् न त्वेवं तेषां साधुतास्यादत आह नियम इति पुण्यजनकत्वबोधाय साधुभिर्भाषितव्यमिति
विधिः पापजनकत्वबोधनाय नासाधुभिरिति निषेधः तथा च साधुत्वं पुण्यजनकतयोग्यत्वं पापजनकतयो
ग्यत्वमसाधुत्वमिति तत्र जनकतावच्छेदिका च जातिः तज्ज्ञापकं च कोशव्याकरणादि एवमेव राजसूर्यादे

वाक्ये न च तत्र शास्त्रान्वितः शास्त्रव्युत्पादनमार्गेणानुसंहितः सुप्रयुक्तः शिष्टोच्चरित्या प्रयुक्त इति तदर्थः ते हे
लयो हेलय इति कुर्वन्तः पराबभूवुरिति श्रुतिश्च यदि तकत्वादिना सा कार्यतावच्छेदकजातित्वाभावो विभाव्यते
तदा त्वसाधुत्वादिकमुपाधिरिति भावः तदनुमापकमिति तद्व्यंजकमित्यर्थः व्याकरणादीत्यादिपदाच्छि
ष्टप्रयुक्तत्वपरिग्रहः एवमेवेति तत्तदर्थपुरस्कारेण तत्तच्छब्दस्य व्याकरणस्मृत्या प्रतिपादनादेवेत्यर्थः ॥

फलाजनकत्ववदिति तत्क्रियाधिकारिकर्त्तृकस्यैव तस्य फलश्रवणादिति भावः साधुत्वमिति गवाद्यर्थपुरस्कारेणैव प्र
रिनिष्ठतगवादिशब्दानां साधुत्वेन स्वर्गफलकत्वादिति भावः तत्राधुनिकदेवदत्ताद्यर्थपुरस्कारेण देवदत्तादिशब्दानां
शास्त्रेऽव्युत्पादनात्तेषां देवदत्तादौ साधुता न स्यादत आधुनिकेति व्युत्तरमिति बोधवदाद्यनन्तरं तस्य व्युत्तरं च तच्छब्दे
ना पुरुषस्य नाम कुर्यात्तद्धितमिति भाष्यस्य स्वरसेनेत्यर्थः तत्तद्देशभाषानुसारेण क्रियामाणानाम पैञ्जी
केञ्जीत्यादिनाम्नां तच्छास्त्राव्युत्पन्नत्वाद साधुत्वमिष्टमेवेति भावः तत्त्वं सत्तागुणपुरस्कारेणाव्युत्पादनात्तत्र तेषां

फलाजनकत्ववद्वादिशब्दानां नां स्याद्दौ साधुत्वमिति संगच्छते आधुनिकदेवदत्तादिनाम्नामपि व्युत्त
रमित्यादिभाष्येणाव्युत्पादनात्साधुत्वं पर्वं च पस्पाशायत्रार्थे व्याकरणेनाव्युत्पादितः स तत्र साधुरिति
पर्यवसितं गोणानां तद्गुणेऽव्युत्पादनात्तत्पुरस्कारेण प्रवृत्तौ साधुत्वमेव ॥

कानां लाक्षणिकार्थपुरस्कारेणाव्युत्पादनात्तत्र तेषामसाधुत्वं स्यादत आह गोणानामिति निरूढलाक्षणिक
कानां नीलादीनामित्यर्थः गुणे नीलादौ व्युत्पादनादित्यस्य गुणवचनेभ्यो मतुपो लुगिष्टः गुणे शुक्लादयः पुंसि
स्यादिकोशेन चेत्यादिः तत्पुरस्कारेणेति नीलाद्यर्थपुरस्कारेणेत्यर्थः शक्यार्थबोधानन्तरमन्वयानुपपत्तिप्रति
संधाने तैर्लाक्षणिकार्थोपस्थापनाच्छक्यार्थोपस्थितिनिर्वंधनं निरूढलाक्षणिकानां साधुत्वमक्षतमेवेत्याशयः ॥

भू॰
सा॰ द॰
१७९
179

आधुनिकेति अनुशासनमनवगृहीतार्थे स्वकल्पितयत्किंचित्संबंधवशात्तदुपस्थापकानामित्यर्थः अतिरिक्तेति द
र्शनात्तद्वारणायमनिसंकेतातिरिक्तशक्तिग्रहेत्यर्थः विषयशब्दाध्याहारेणव्याचष्टे संबंधोविषयइति तथाचापमेतत्संबं
धीतिव्यवहारेसंबंधोविषयइदमत्रयोग्यमितियोग्यतांप्रतियोग्यतव्यवहारेयोग्यताविषयोयतोतस्तद्व्यवहारादति
रिक्तशक्तिग्राह्येतिसमुदितार्थः तत्रदृष्टान्तोमातापुत्रादियोगवदिति पृष्ठायमेतत्संबंधीतिव्यवहारस्तयोजन्य
जनकभावतिष्ठायकस्तद्वदित्यर्थः अन्येत्विममित्यंव्याचक्षते संबंधिशब्दे अयमेतितत्संबंधीतिव्यवहारे योग्यतां

आधुनिकलाक्षणिकानांत्वसाधुत्वमिष्टमेव अतएवब्राह्मणायदेहीत्यर्थेब्राह्मणदेहीत्यादिकंलक्षणया
प्यसाधुरित्यादिप्रपंचितंभूषणे अतिरिक्तशक्तिग्रहोपायमाह संबंधिशब्दे संबंधोयोग्यतांप्रतियोग्यता
समयायोग्यतासंवित्मातापुत्रादियोगात् ॥ संबंधोविषयः योग्यता प्रतियोग्यतासंबंधं प्रतियोग्यतावि
षयइतिसमयाद्व्यवहारात् योग्यतासंवित् शक्तिग्रहः घटपदमत्रयोग्यमेतत्संबंधीतिव्यवहारात्साग्रा
(ह्ये)त्यर्थः इतिवैयाकरणभूषणसारेशक्तिनिरूपणं ॥

प्रति अर्थंबोधजनकतावच्छेदकरू मेवतत्स्वरूपयोग्यताव्यवहार
निरूपितोयःसंबंधस्तान्यतरस्तोन्योवासएवयोग्यतापरपर्यायः विषयइतिशेषः साचानादिःस्वव्यवहारपरंप
रायाअस्मदादिसमयात्त्रिज्ञायते ततजनकत्वमेवशक्तिरेतज्जननेयंयोग्यइतिव्यवहारात् अतएवैतद्धेसतिप्रम
यहेतत्वसंबंधेउपपद्यते शब्दस्यार्थेयतस्तस्मात्संबंधोस्तीतिगम्यतइत्यत्रेनोक्तार्थएवविशदीकृतइति इतिभूषणसारद

शक्तिनिरूपणं ॥
१७९

पदं चतुर्विधं नामाख्यातोपसर्गनिपातभेदादिति निरुक्तौ यद्यपि नामार्थनिरूपणानन्तरमवसरसंगत्योपसर्गार्थस्से
व निरूपणमुचितं तथापि प्रायशो वाक्यजन्यबोधे क्रियायाः प्राधान्यादुद्देशक्रममनादृत्य प्रथममाख्यातार्थनिरू
पणवदन्यानुपसर्गनिपातार्थयोर्मध्ये नञ्स्वरूपनिपातार्थस्य वाक्यार्थविशेष्यत्वादसमस्तनञर्थस्यापि नामार्थवि
शेष्यतायामव्युत्पाद्यविशेष्यमाणत्वात् प्रथमं नञर्थनिरूपणमिति निपतनयन्नाह नञर्थमाहेति यद्यप्येतावदसेवसा
मासे खलु भिन्नैवेत्यत्र व्यवस्थापितं तत्वे नसमासशक्तिप्रस्तावे। घटइत्यादिसमासघटकतया स्वतन्त्रस्य नञोर्थो निरूप

नञर्थमाह नञ्समासे चापरस्य प्राधान्यात्सर्वनामता आरोपितत्वं नञ्योत्यं नह्यसोप्यतिसर्ववत् नञ्समासेः
परस्योत्तरपदार्थस्य प्राधान्यात्सर्वनामता सिद्धा नीतिशेषः अतएवारोपितत्वं नञ्योत्यमित्यभ्युपेयमिति
शेषः अयंभावः असर्वइत्यादावारोपितः सर्वइत्यर्थे सर्वशब्दस्य प्राधान्याबाधात्सर्वनामता हि द्यति अत
स्यातिसर्वइत्यत्रैवसा तस्यात् ॥

णमपेक्षानर्हतावच्छेदकधर्मवत्त्वरूपप्रसंगादित्याह नञर्थमाहेति अधिकमग्रे वक्ष्यते नञ्समासे अघटइत्या
दौ अतएवेति सर्वनामत्वानुपपत्तेरेवेत्यर्थः सर्वनामत्वानुपपत्तिमेव प्रकटयति अयंभावइत्यादिना अन्यथेति
समासान्तर्गतनञोभेदार्थकत्वाभ्युपगमइत्यर्थः नञर्थभेदस्य प्रतियोगितया योगितयोत्तरपदार्थान्वयिनोनुपयोगि
तया समभिव्याहृतपदार्थेन्वयोगिकारेइतियावत् तानस्यादिति असर्वइत्यादौ सर्वपदार्थभेदे गुणीभूतत्वात्सर्वना

संज्ञाकरणेतयोगितप्रष्टविशेष्यतादिमिभावः ॥

भू॰
सा॰ द॰
१८०

नन्वसर्वइत्यादौप्रतियोगितयाभेदान्वयात्सर्वइतिबोधाभ्युपगमात्सर्वांशेसम्प्राप्यान्यत्रानिरस्तमाह घटोनास्तीत्यत्रेति तस्यनञ
र्थस्य दर्शनादिति उक्तबोधस्यसर्वानुभवविरुद्धत्वादघटमानयेत्युक्ते प्रतियोगितयाभेदवत्त्वस्यघटेसत्त्वात्तदानयनबोधाय
त्रिविधाय ननुतथापिअघटःपटस्तत्रघटभिन्नःपट इतिसर्वजनप्रसिद्धबोधानुपपत्तिरतआह अस्मदीत्याचेति सः
घटभिन्नइतिबोधः मानसइतिशाब्दबोधोत्तरकालिकइत्यर्थः नत्वशाब्दइत्यपसिद्धपर्वेतिभावः नन्वसर्वइत्यत्र
सर्वांतस्यसर्वनामसंज्ञाभावेकागतिरतआह तथाचेति अत्रचेति आरोपितत्वेनञ्द्योत्यमितिनिपत्तेचेत्यर्थः निष्क

घटोनास्तीत्यादावभावविषयकबोधेतस्यविशेष्यतायाअदर्शनात् अस्मदीत्याचसम्प्रार्थ्योबोधोमानसः त
थाचासर्वस्मापित्याप्रसिद्धिप्रसंगइति अत्रचारोपितत्वमारोप्यविषयत्वं आरोपमात्रमर्थोविषयत्वेतुसंसर्गं
इतिनिष्कर्षः द्योत्यतोक्तिर्निपातानांद्योतकत्वमभिप्रेत्यघटोनास्त्यब्राह्मणइत्यादावारोपबोधस्यसर्वानुभववि
रुद्धत्वात्मतांतरमाह अभावोवातदर्थोस्तुभाष्यस्यतुतदाशयात् विशेषणंविशेष्योवान्यायतस्त्ववधार्यतां ॥

र्थइति विषयत्वस्यसंसर्गमर्य्यादयैवलाभादनत्यलभ्यारोपस्यैवनञर्थत्वंयुक्तं ननुआरोपविषयत्वविशिष्टस्यगौरवादि
तिभावः ननुआरोपस्यवाच्यत्वेमूलेतस्यद्योत्यत्वोक्तिर्विरुद्ध्येतेत्यतआह द्योत्यत्वोक्तिरितिवाच्यस्यापितस्यविशेषणतेवना
भावार्थत्वविशेष्यतेतिसत्त्वपित्वंतथोक्तिरितिभावः घटोनास्तीत्यपिसमासांतर्गतस्यैवनञआरोपार्थकत्वंमूले
उक्तंतथापिघटोनास्तीत्युक्तिरत्रैवतत्राप्यारोपस्यारोपस्यानुभवइतिदृष्टांतप्रदर्शनायेतितदोषइत्यवधेयं नञ्

द्योत्यमित्यत्रनञोविशेषणतयाबोधस्थितत्वाव्यवहितत्वाच्च ॥

तदुक्तत्वगमर्शित्वं कथमिति शंकाभूदित्याशयेनाह तदर्थो नञर्थ इति तथा च सर्वनाम्नामव्यवहितप्रधानपरामर्शि
त्वमित्युत्सर्गमात्रं प्रधानाव्यवहितत्वयोस्तत्रानैयत्यात् किं तु बुद्धिस्थपरामर्शित्वमित्येव नियमः तच्चाव्यवहितवि
शेषणसाधारणमयीति न दोष इति भावः साधारण्येनेति प्रकृते ऽर्थपदस्य नञ्जन्यप्रतीतिविषयमात्रपरत्वादि
ति भावः योग्यार्थस्य विशेष्यतया बोधस्य प्रायशो नञ्भवाद्यात्मकत्वयत्नयबोधितत्वमिति विभावनीयम् नञ्वाच्य
त्वादिति यद्यपि तत्र पदार्थप्रधानत्वेन नञ्समासस्य ब्राह्मणमात्रस्यानयनं प्राप्नोति नञः प्रयोगात्तु नञर्थवि

तदर्थः नञर्थः अर्थपदं वाच्यत्वयोग्यत्वयोः साधारण्येन कीर्तनाय भाष्यस्येति तथा च नञ्सूत्रे भाष्ये
निवृत्तपदार्थक इति निवृत्तं पदार्थो यस्य नपुंसके भावे क्तः अभावार्थक इत्यर्थः यत्र निवृत्तः पदार्थो यस्मिन्निति त्र
त्यर्थः सादृश्यादध्यारोपितब्राह्मण्यः तत्क्रियादयोस्येति कैयटस्तत्र आरोपितब्राह्मण्यस्तत्क्रियादेर्नञ्वाच्यत्वा

त ॥

शिष्टस्यानयनं भविष्यति कः पुनरसौ नञर्थो निवृत्तपदार्थकः ब्राह्मणदृष्टगुणस्य गौरादेर्दर्शनाद्दृष्टोप
देशाद्वा ब्राह्मणोयं ब्राह्मणोयमध्यवस्यति ततः पश्चादुपलभते नायं ब्राह्मण इति ततोऽब्राह्मणोयमि
ति प्रयुंक्ते अतस्तद्दृष्टगुणदर्शनाद्दृष्टोपदेशाद्वा ब्राह्मणत्वाध्यवसायपूर्वकमेव न ब्राह्मण इति प्रयु
क्ते न तु पंकालवर्णमापणोपस्थं दृष्ट्वाध्यवस्यति ब्राह्मणोयमिति यद्यपि तेवस्तुतत्त्वे तस्य निर्ज्ञानं भवतीति

मू॰
ता॰ द॰
१८१
181

नञ्सूत्रभाष्यपर्यालोचनया कैयटोक्तार्थस्यैव साधुत्वं प्रतीयते तथापि नञ्सूत्रभाष्यस्याभावप्रत्यत्वे योग्यानुपलब्धेरिदं तत्त्वप्रति
पादनपरतयाप्युपपन्नेनैतद्दर्शननिर्भरः अन्यथा घटान्यत्ववति रूपधर्मिणि पटे घटारोपासंभवेन नञा घट इति प्रयोगानु
पपत्तेर्घटो न पट इत्यत्राप्युक्तस्थल इव कथंचिदारोपसंभवेन चास्मै नञोऽपि भेदार्थकत्वानुपपत्तेश्चेति नञो
भावार्थकत्वप्रतिपादनायनिष्ठत्वपदस्य भावकत्वं तत्त्वमावश्यकमिति भावः नच ब्राह्मणमानयेत्यादौ न
ञो भेदार्थकत्वे ब्राह्मणभिन्नस्य घटस्याप्यानयनापत्तिः नचेष्टापत्तिः तथा सति न ह्यब्राह्मणमानयेत्युक्ते
लोष्टमानीय कृती भवतीति भाष्यविरोधादिति वाच्यं घटत्वेन घटमात्रार्थकघटपदात्मकरणादिना सन्निहि
त घटव्यक्तिबोधवदब्राह्मणपदादपि ब्राह्मणभिन्नत्वेन क्षत्रियादेरेव तेन बोधसंभवात् किंच प्रतियोग्यभा
वान्वयोस्तुल्ययोगक्षेमाविति नोक्तिबोधात्केनैव समभिव्याहारे यद्धर्मावच्छिन्ने येन संबंधेन यद्धर्मावच्छिन्नस्य प्रका
रतया भानं नञ्समभिव्याहारे तद्धर्मावच्छिन्ने तत्संबंधावच्छिन्नतद्धर्मावच्छिन्नाभावः प्रकारतया भासते यथा भूतले
घटो नास्तीत्यादौ एवं चासति विशेषदर्शने समानविभक्तिकत्वरूपाकांक्षावशान्नञ्समभिव्याहारे घटः पट इत्या
दौ घटे प्रकारतया तादात्म्येन पटस्य भानात् घटो न पट इत्यादावपि नञ्समभिव्याहारे घटे तादात्म्येन नञस्तादात्म्येन
पटाभावबोधकत्वं समुचितं अन्यथायं पट इत्याकारकभ्रमदशायामयं न पट इत्याकारकवाक्यात्तद्बोधापत्तेः
घटो न पट इत्याकारकवाक्यजबोधस्य पटारोपविषयो घट इत्याकारकस्य विभिन्नविषयकस्य तादृशबोधाप्रति

१८१

वधत्वात् नब्राह्मणौ रैनैरुपद्धुत निमित्यादौ त्वभेदेन सान्ताद्विशेषणविशेष्यभावापन्नयोरिव नञर्थभेदद्वारा विशेषणवि
शेष्यभावापन्नार्थकयोरपि प्रातिकयोः समानविभक्तिकत्वनियमात्साधुत्वं अतएव घटो न नील इत्यादावपि वयत नि
भुयेयजामहे करोति नानूयाजेष्वित्यत्र प्रथमायाः अप्रसक्तिः अत्रापि नञ् नप्रसज्य प्रतिषेधार्थकः किन्तु पर्युदासा
र्थकः नञा भेदबोधे समानविभक्तिकत्वस्य विरुद्धविभक्तिराहित्यस्य वा तन्त्रत्वात् तस्य च प्रकृते सत्त्वात् विरुद्धविभ
क्तिराहित्यं च क्वचिद्विशेष्यपदे विशेषणपदीयत्व क्वचिच्च विशेषणपदविशेष्यपदीयत्व तच्च विशेषणवाचकपदात्मकप्रकृ
तिकविभक्तिविभाजकप्रथमात्वाभाववत्त्वस्य घटितकत्वे तेन चैत्रो न पचतीत्यादौ वैयाकरणमते चैत्रे पाककर्तृत्वे
नञा भेदबोधनेऽपि न तन्त्रतिर्नैवा न लोके पचतीत्यादौ व्यभिचारः घटो न नील इत्यादौ तु भूमयापि वियमेव उक्तवाक्ये यजर
तिशब्दो यागस्वरूपयागार्थवाचकः तथा चानूयाजभिन्नेषु यागेषु येयजामहे इति शब्दवन्मन्त्रं करोति इत्युच्चारयति इ
त्यर्थः अत्र नञोऽन्योन्याभावबोधनेऽनूयाजभिन्नेषु येयजामहे पदवन्मन्त्रप्रयोगरूपैकार्थविधानसंभवेनैकविधेया
र्थकत्वमुपपद्यते अन्यथा यागेषु येयजामहे पदवन्मन्त्रविधानम् अनूयाजभिन्नेषु तन्निषेधविधानमिति द्विविधविधेया
र्थकत्वरूपवाक्यभेदापत्तेर्येयजामहे इत्यादेरनर्थकत्वकल्पने गौरवाच्चेति अयमेव शास्त्रीयविहितप्रतिषिद्धत्वात्मो
ऽशिग्रहणाग्रहणवद्विकल्पापत्तेर्नानूयाजेष्वित्यत्र नञः पर्युदासार्थकत्वं तथाहि क्रियायाः कारकसाकाङ्क्षत्वाद्वि
तिगमनाविरहेण सकलकारकविशिष्टा प्रतियोगिभूताभाव नामदिशाभावस्य विधिस्तत्र वाच्यः एवं चोद्देश्य
स प्रतियोगिनः प्रसिद्ध्यर्थं तत्त्वात्मिरपेक्षिता प्राप्तिसापेक्षत्वात्प्रतिषेधस्य प्राप्तिश्च विदायागतो यथा न कलञ्जं भ

मू॰
सा॰ दा॰
१८२

182

त्तयेदिति तत्र कलंजभक्षणादेरागतस्येष्टसाधनत्वावगमाप्रसक्तायाः कलंजभक्षणभावनायां निषेधशास्त्रेण नि-
वृत्तिविधयत्वे वगते स्वर्थात्तद्विषयकलंजभक्षणस्यानिष्टसाधनत्वात्ते पान्नतो निवृत्तिः प्रकृते च ये यजामहे शास्त्रा
देवस्य एवं च निषेधस्य शास्त्रविषयत्वे न प्राबल्यवद्विधिशास्त्रस्याप्युपजीव्यत्वेन प्राबल्यान्निषेधेन विधेरत्य-
न्तबाधायोगाद्विकल्प एव प्राप्नोति विकल्पे च प्रथमं व्रीहिलब्धे नेयवशास्त्रस्य प्रामाण्यस्वीकारात्मा प्रतीतप्रा-
माण्यपरित्यागो वेदस्य विपर्यासरूपप्रामाण्यजनकत्वासंभवात् ततः प्रयोगान्तरे यवोपादाने यवशास्त्रस्य
स्वीकृतप्रामाण्यपरित्यागात्मकं परित्यक्तप्रामाण्योपादाने व्रीहिशास्त्रस्वीकृतप्रामाण्यपरित्यागात्मा त्य-
क्तप्रामाण्यस्वीकार इति चत्वारो दोषा एवमन्येऽपि यथाकथंचिद्दोषपादने न चत्वारो दोषा इष्टदोषगुरुत्वविक-
ल्पप्रसक्तौ तन्नजनुयाजपदाभ्यामनुयाजभेदो बोध्यते अस्मिन्पक्षे ये यजामहे नकर्तव्यतया प्रतीयते यजतिषु
ये यजामहं करोतीत्यनेनैव तस्य विधानात् किं तु सामान्यशास्त्रविहितयेयजामहस्यानूद्यतस्यानुयाजव्यति-
रिक्तविषयता बोध्यते तथा च सामान्यशास्त्रस्य विशेषविधिसापेक्षत्वात्नानुयाजेष्वित्यनेनानुयाजव्यतिरिक्तवि-
षयसमर्पणादनुयाजव्यतिरिक्तेषु ये यजामहा कर्तव्यतया प्रतीयते अनुयाजेषु तस्य न कर्तव्यतया प्राप्तो न प्रति-
षिद्ध इति न विकल्प इति न च नञा निषेधबोधनेऽपि पदशाहेणार्थवनीयशास्त्रस्येव नानुयाजेष्विति विशेषशास्त्रेण य-
जतिषु ये यजामहं करोतीति सामान्यशास्त्रस्य बाधात्र विकल्प इति वाच्यं परस्परनिरपेक्षयोर्हि बाध्यबाधकभावः

९ परित्यागरूपोऽप्रतीतप्रामाण्यस्वीकारः पुनस्तृतीयप्रयोगे व्रीह्युपादाने व्रीहिशास्त्रस्य स्वीकृतप्रामाण्य ८२

पदशास्त्रेण हवनीयशास्त्रानपेक्षणाद्बाध्यबाधकभावव्यवस्थितिः निषेधशास्त्रस्य तु प्रसिद्ध्यर्थमस्ति विध्यपेक्षा
सक्तेदि प्रतिषिध्यत इति न्यायात् तेन नञ्बाधासंभवात् किन्तूक्तरुत्या विकल्प एव विहितप्रतिषिद्धत्वात् नास्मि
न्षोडशिरष्टकलत्तनाप्रसंगश्च विधेर्हि विज्ञायते पदन्तु याजेष्वयेयजामहकरणे तत्कस्य तेनोपकारो भवति
निषेधात्तु न करणादन्नवदनाकरणादिवद्दर्शपूर्णमासयोः सचोपकारोऽदृष्टरूप एवेत्यतो पि विक
ल्पो न युज्यते उक्तः तत्र निषेधशास्त्रानालोचने सामान्यशास्त्रालोचनमात्रेण भ्रमात्मकप्रतियोगिप्रसिद्ध्यामा
वबोधसंभवेन विकल्पाप्रसक्तेः विशेषनिषेधे सामान्यविधेस्तदितरपरत्वस्य ब्राह्मणेभ्यो दधि दा
तव्यं कौण्डिन्यायन दातव्यमित्यादौ व्युत्पत्तिसिद्धत्वाच्च नञ्तत्रापि पर्युदास एव ननाबोध्यते नञ्पर्युदास
बोधने विशेष्यविशेषणवाचकपदयोः समानविभक्तिकत्वस्येव तयोः समानवचनत्वस्यापि तन्त्रत्वया
तस्य च प्रकृतेऽभावेन पर्युदासबोधनासंभवात् अन्यथा महतो राज्ञो न महतो राज्ञ इत्यादाविव मह
तो राज्ञो न महतो राज्ञ इत्यादावपि महद्भेदः प्रतीयेत एको न द्वाविति वक्तव्यं चित्त्वसमर्थनेपि द्वितीयस्य
दातव्यमित्यस्यानैरर्थक्यप्रसङ्गः ब्राह्मणेभ्यो दधि दातव्यं कौण्डिन्यायनेत्येतावतैव कौण्डिन्यभिन्नब्राह्म
णसंप्रदानकदधिदानबोधसंभवादित्यन्यत्र विस्तरः प्रकृतमनुसरामः ॥

मू॰
सा॰ द॰
१८३
183

अन्वयेनेति आरोपितब्राह्मणस्य हि त्वयादेर्नञ्वाच्यत्वे इत्यर्थः आरोपितत्वस्य नञर्थत्वे इति यावत् सादृश्यादेरित्या
दिना ऽल्पत्वादेः परिग्रहमाणस्य संग्रहः नञभावस्य तद्वाच्यत्वस्य सर्वसंमतत्वेनेष्टापत्तिसंभवात् अब्राह्मण
इत्यादिरारोपितो ब्राह्मणः पापाभावो धर्मिण्यो ऽल्पोदरा गवाच्चेतरे पशवो ऽप्रशस्ता धर्मा विरुद्ध इति क्रमेणार्थः ननु सा
दृश्यादेर्वाच्यत्वे कथं तत्र तद्बोधो न स्यादाह नन्विति भेदप्रतियोगित्वेन ब्राह्मणबोधानन्तरभाविमानसबोधमभि

अन्यथा सादृश्यादेरपि वाच्यतापत्तेः यत्तु सादृश्यमभावस्तदन्यत्वं तदल्पता अप्राशस्त्यं विरोधश्च नञ
र्थाः षट् प्रकीर्तिता इति पठित्वा ऽब्राह्मणः अनश्वः अनुदरा कन्या अपशवो ऽन्ये गोभ्यः अधर्मः इत्युदा
हरंति तत्रार्थिकार्थकथनमभिप्रेत्येति स्पष्टं विशेषणं प्रतियोगीनीति शेषः तथा च सर्वपदे सर्वनाम
ता ऽनेकमन्यपदार्थे सत्यनेनैकया सत्र नागणगयेत्यादावेकशब्दप्राधान्यादेकवचननियमः अब्राह्मण
इत्यादावुत्तरपदार्थप्राधान्यात्तत्पुरुषत्वं अत्वं भवस्तदहं भवामि इत्यादौ पुरुषवचनव्यवस्थाप्युपपद्यते ॥

प्रेत्येत्यर्थः ब्राह्मणबोधस्य ब्राह्मणपदोपादानमात्रेण संभवाद्भेदप्रतियोगित्वेन ब्राह्मणबोधनाय पदब्रा
ह्मणपदोपादानेन तत्सादृश्यादिनान्तत्रिपर्वोपार्थ्यमित्यूह्यमूलकत्तत्रियादिबोधस्य भेदप्रतियोगी ब्राह्मण इति
शाब्दबोधो न स्यादेवं संभवादिति भावः तद्बोधे शाब्दत्वप्रत्ययस्यानुभवसिद्धत्वात्तल्लक्षणया सादृश्यबोधस्य

१८३

इति बहवः नञर्थभेदस्य प्रतियोगितयोत्तरपदार्थान्वये साधकमाह तथाचेति एकवचनमित्याद्युपपद्यत
इत्यनेनान्वयि सर्वनामसंज्ञेति संज्ञोपसर्जनीभूतास्तु न सर्वादय इति सिद्धान्तात्सर्वाद्यर्थस्य नञर्थभेद
विशेषणत्वेऽप्राधान्यात्तदनुपपत्तिरिति भावः अनेकमित्यादावेकभिन्नमिति बोधे स्वीक्रियमाणे एक
प्रतियोगिकभेदवतिद्वित्वस्य बहुत्वस्य वानियमेन सत्त्वात्तद्द्योतनाय द्विवचनबहुवचनयोरापत्तिरयो
ग्यत्वादेकवचनानापत्तिश्चेति भावः नन्वहं त्वामिति तत्त्वमयीत्यर्थः इदं च प्राचीनमताभिप्रायेण
पुरुषेति तिबादित्रित्रिकसंकेतितपुरुषस्येत्यर्थः वचनेति एकवचनादिरूपेणेत्यर्थः अत्रेम
वसीत्यत्र त्वन्मतेऽप्याख्यातार्थभावनायाः प्रथमान्तार्थेऽन्वयेन तत्रैवाख्यातार्थसंख्याया अन्वयोऽभ्यु
पगन्तव्यः भावनान्वयिनि संख्यान्वय इति नियमात् तथा चायुवां भवथोऽयूयं भवथेत्यादौ युष्म
दर्थप्रतियोगिकाभावे नञर्थे द्वित्वाद्यन्वयायोग्यत्वाद्द्विवचनाद्यनुपपत्तिरिति भावः अनुपप
त्तिपरिहारस्तु तन्मतेऽपि वक्ष्यते अन्यथेति नञर्थाभावस्योत्तरपदार्थाविशेषणत्व इत्यर्थः ॥

भू॰
सा॰ द॰
१८४
184

विशेष्यत्वेऽहमिति यावत् पुरुषव्यवस्था न स्यादिति युष्मद्युपपदे इत्यापत्तिविषयतया शेषे प्रथमइत्यस्यैव सर्वत्र प्रसक्तेरित्य
र्थः नानुपपन्नमितीति तथा चोक्तव्यवस्थासलभेतिभावः ननु नञर्थभेदस्य प्रतियोगितयोत्तरपदार्थान्वयेऽघट
मानयेत्यादौ घटस्यापि भेदप्रतियोगितोत्तरस्याप्यान्वयनापत्तिरतआह मूले विशेष्यो वेति विशेषणे कोत्तया
माऽहमूषणत्सारे प्रतियोगिनीति उत्तरपदार्थरूपप्रतियोगिनीत्यर्थः निरूपितत्वं सप्तम्यर्थः तथा चोत्तरप

अन्यथा त्वदभावो मदभाव इतिवदभावांशे युष्मदस्मदोरन्वयेन युष्मदस्मत्सामानाधिकरण्यस्येति
इत्थं सत्ता पुरुषव्यवस्था न स्यात् अस्मन्मते च भेदप्रतियोगित्वदभिन्नाश्रयैककर्तृकाभवनक्रिये
त्यन्वयबोधात्सामानाधिकरण्येनानुपपन्नमिति भावः विशेष्येवेति प्रतियोगिनीति शेषः अयं भा
वः गौणत्वेपि नञ्समासे पत्वत्वदोः स्यलोपो कोरजञ्समासेहलीति ज्ञापकात्सर्वनामसंज्ञानानुपपन्ना॥

दार्थप्रतियोगिनिष्ठविशेषणतानिरूपितविशेष्यताश्रयो नञर्थ इत्यर्थः ननु तर्हि उत्तरपदार्थप्राधान्याऽऽक्र
ष्टषणगणप्रसक्तिरत आह हार्येभाव इति गौणत्वेपीति नञ्सूत्रस्य घटके तदादर्थस्य नञर्थभेदांशे विशेष
णत्वेपीत्यर्थः ज्ञापकादिति नत्सूत्रस्य नञ्समासग्रहणाज्ज्ञापकादित्यर्थः ॥

नामेव प्रपंचयति अत्र सः शिव इत्यत्र न तद्दोषः इति तदन्ते न हि सर्वनाम्नि तत्र दोषः इति तल्लोपो विधीयते नन्वत्र तत्पुरुषे तद्गते
तद्दोषः उपसर्जनतया सर्वनामत्वादेवानतिप्रसंगे व्यर्थं नञ्समासग्रहणं गौणेपि सर्वनामता स्यादनेन चरितार्थ
मिति भावः ननु तत्र सर्वनाम्नोरेव तयोर्ग्रहणमत्र किं प्रमाणमनत्र आह अकोरिति यः सर्वनाम्नः सर्वनामविहिताक
ज्संभवे न तद्विशेषणात् सर्वनाम्नोरेव तयोर्ग्रहणमेतत्र किं तदर्थं गतम् संख्याभिधायि सोलोप इति व्याख्याने त्वारे

अत्र सः शिव इत्यत्र लोपवारणाय नञ्समास इति विशेषणं न च तत्र उह्रस्य सर्वनामतास्ति गौणत्वात् अ
कोरित्यकज्व्यावृत्त्या सर्वनाम्नोरेव तत्र ग्रहणलाभात् तथा च नञ्समास इति ज्ञापकमेव वचं अनेकमन्य
पदार्थे इत्यादावेकवचने विशेष्यानुरोधात् स्वामन्त्रिते पराङ्गवत्स्वरे इत्यतो न यत्नमानं स्वग्रहणमे
कवचनान्तमेव किं चानेकशब्दादिवचनोपादानेव इत्वनो एकवचनोपादाने इह योर्वर्ज्यश्रीहिर्नेति सिद्धो दिन
मध्यसंग्रहायैकवचने जात्यभिप्रायमौत्सर्गिकं वा सेव्यते व्येत्यत्रापि पोषये नि विशेष्यानुरोधात् ॥

पस्य तत्त्वार्थत्वादिमतानुसारेणेति भावः विशेष्यानुरोधादि अत्र सति विशेष्यानुशासने विशेषणवाचकप
दयोः समानवचनत्वनियमादिति भावः ननु विशेष्यानुरोधस्य वचननियामकत्वे वर्षा हेमन्त इत्यादावप्येकव
चनान्तता यत्निरत आह किं चेति औत्सर्गिकं वेति वा शब्दो वा च अत्र सति विशेष्यानुशासने इति निदयमेवविशे
षणाद्यकस्य तेदोषाप्रसक्तिः स्त्रियां भूम्नि वर्षाः इत्यमरस्य नित्यबहुवचनान्तताप्रतिपादकस्य सत्त्वात् ॥

मू॰
सा॰ द॰
१८५

185

नन्वत्र गतान्यसंख्यासत्त्वे विशेष्यगतसंख्यागतसंख्यया वचनं भवतीत्यनुपलब्धेः कथमेतदित्यत आह प्रत्येकमिति
अन्यथा वाक्यस्य विभज्यान्वाख्यानपदेन वाप्यारोपितैकत्वेनोपस्थितायां योषायामनारोपितैकत्वार्थकैकवचनानुप
पत्तेः समस्तैकभिन्नत्वेनोपस्थितासु प्रत्येकं सेवनान्वयबोधनायैकवचनोपपत्तिरिति भावः अत एवेति अनेकशब्दस्यैक
भिन्नद्विबह्वर्थप्रतिपादकत्वादेवेत्यर्थः स्तूपयामिति एकशेषासमर्थत्वेन दुरुपपादमिति भावः मायोदारिह नेत्वेद
लिष्टनीति प्रयोगे जनकस्याप्याहार्यं प्रत्येकं स्थितत्वयबोधार्थैकवचनं अनेकाजनताश्रागतानामन्यस्य स्ववासनामा

प्रत्येकं सेवनान्वयबोधनायैकवचनं ननु त्वत्र परार्थप्राधान्यप्रयुक्तं अत एव यस्यत्वेकेजन्तलयेरिति भूयया दम
अनेन भवसीत्यादौ युष्मदस्मद्द्वित्रेलत्तलणनत्वयोनकः तथापि भिन्नेन युष्मदर्थेन तिङः सामानाधिकरण्या
नुरूपस्य वस्यावहित्वाश्रयिका भवनक्रियेति बोध्यः ॥

त्वकल्पितमेव साधुत्वं न तु पुरुषस्यात्र परार्थप्राधा
न्येतत्तत्सार्वत्रिकं अर्हैपिप्पलीत्यादौ व्यभिचारादिति भावः यद्यपि जहत्स्वार्थावृत्तिरितिवादि नो समासघटक
पदानामर्थविचारोऽनेनानभिमतत्वप्रतिपादकस्तथापि तदर्थे निरूपणीये नञित्यादिसूत्रप्रामाण्यात्कल्पितकेन र
स्मिन्मतनिरासार्थं तथाभिधानमिति विभावनीयं अत्वं भवसीत्यादिना तदहं भवामीत्यादिपरिग्रहः नद्वित्रेलत्त
लेति इदं तु नैयायिकमते स्वमते तु शक्तैव तेषां बोधकत्वं लक्षणाहत्रेरनभ्युपगमस्योक्तत्वात् अत्वं भवसम्तरं
भवामीत्याद्यारोपबोधस्य सर्वानुभवविरुद्धत्वात्तन्ममासे सर्वत्रोत्तरपदस्यापि भिन्नत्वात्तणिकत्वमेव युक्तमित्यवधेयं